
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

॥३॥

सर्ग१०

॥श्रीगणेशाय नमः॥ नीलकण्ठेश्वराय नमः॥ वैदेहि यस्य वामे जयति जयजनिर्दक्षिणे लक्ष्मणो
ऽपि श्रीमानग्रे हनूमानतुलबलचयो हस्तविन्यस्तनत्व॥ कोदण्डं काण्डमेकं दधच्च दहिनकुल
ध्वंसकारी समन्तात् ध्यायेद् व्याजजन्याकृतिसलिलनिधिर्जानकीजानिरस्मान्॥१॥ दशाक
चरकरिसिंहः सीताचेतःसरोजरोलम्बः॥ रघुकुलकैरवचन्द्रः पायाद्दयासमुद्रो रामः॥२॥ न
म्रायत्तयाद्भवनो श्रीरामानन्दिनाविनः॥ स्मर्तेन रुज्जनने यस्य पदवी सुरदुर्लभा॥३॥ नत्वा
श्रीनरसिंहपण्डितपितुः पादारविन्दद्वयं मातुश्चापि मतल्लसे सनिधियां विख्यातकीर्ते
श्चितो॥ श्रीरामेश्वरसोनयोः स्मरमनसो गुर्वोरगुर्वीयथा बुद्धिश्री नैषधेन्द्रकाव्यविवृतिं
निर्मीति नारायणः॥४॥ प्रणम्य शंकरं सोममनन्तश्रीपतिं समं॥ कुर्वे नाम्ना नैषधीयप्रकाशं
स्फुहृदां मुदे॥५॥ चिकीर्षितस्य ग्रन्थस्य निर्विघ्नसमाप्त्यर्थं शिष्टाचारपरिप्राप्तमाशीर्नमस्क्रि
यावस्तुनिर्देशो वापि तन्मुखमिति मंगलाचरणं कर्तव्यमिति ग्रंथकृत् श्रीहर्षनामा कविः गु
रुंस श्रीजरघुनाथाभिष्टदेवतानमस्काररूपमंगलमाचरति॥ अन्ये तु विशिष्टवस्तुनिर्दे
शलक्षणं मंगलमित्याहुः॥ अत्र पुण्यश्लोकनलरूपविशिष्टवस्तुनिर्देशेन निर्विघ्नग्रंथ

॥३॥

समाप्तिरित्यभिप्रायेणाह ॥ निपीयेति ॥ स नल आसीदिति ॥ पृथ्वादीनां स्मरणमपि सकलाभीष्ट
हेतुः ॥ किंपुनः कीर्तनमिति ॥ किं विशिष्टो नलः महसां राशिः प्रतापानामाश्रयः ॥ यद्वा मह
सां तेजसां राशिः सूर्य इव स्थितः ॥ लुप्तोपमा ॥ लुप्तोत्प्रेक्षा वा ॥ एतेन स एव तेजस्वी सूर्यव
न्नान्य इति व्यंग्यं ॥ संक्षेपः बुधाः सूक्ष्ममतयः यस्य प्रजापालनरूपाः कथाः गोष्ठीः निपीय सा
दरं श्रुत्वा सुधामपि अमृतमपि तथा नाद्रियंते ॥ यथा पूर्वमवमन्ये तथा गाढिसाध्ये सादरा
आसंस्तथा नलकथाश्रवणानंतरं नेति ॥ ततोप्यधिका नलकथेति भावः ॥ कथामिति पा
ठः सापीयानु ॥ ग्राकरादिमथ्ररद्व्यादपि सुधाया मादर इति भावः ॥ यदीया कथा अमृता
दपि सुरसे स्वर्थः ॥ एतेनेंद्रादीनां त्यागेन नले दमयंत्यनुरागस्यौत्सनितः युक्तः ॥ यद्वा बुधाः
देवाः सुधां पसोपि तां न आद्रियंते ॥ यत्कथा अमृतादप्यतिमनोहरा इत्यर्थः ॥ यद्वा व्याप्ति
नाक्षितिरक्षिणो बुधाः देवाः यत्कथामाकर्ण्य स्वकष्टं सुधामपि मनोहरां कांतिं पातिरक्षतिस्व
धामपार्श्वे द्रस्तस्मिन् नलकथावत् पूर्वं तथा नाद्रियंते ॥ बुधाः ज्ञानैः क्षितिरक्षिणः अ

न्यैराजानोयज्ञादिनाऽऽश्रंस्मरनमपिनाद्रियंतेइति वा॥ यद्वा पुण्यमंडलच्चारणादिनाक्षितिरक्षंती ति
ते क्षितिरक्षिणः शेषतक्षकादयो नागाः॥ स्कथा भुजंगभोजनमित्यभिधानात्॥ स्वीयं
भोजनमंमस्मरनमपि॥ इंद्रेणरक्षणार्थमर्पितंअंस्मरतं वा नाद्रियंते यतो बुधास्तारतम्यवि
ज्ञातारः॥ क्षितिरक्षिसुनक्षकादिषु शेषसालच्चर्यात उपचर्यते॥ एतेन व्याख्यानत्रये
णनलकीर्त्तेःलोकत्रयव्यापीत्वं युज्यते॥ यद्वा क्षिति अक्षिण इति पदद्वयं॥ अक्षो बिभीत
तकोनिवासोस्यास्तिसप्तक्षीकलिः॥ यस्य कथा निपीयस्थितस्य पुरुषस्य अक्षिणः कलेः
क्षितिः नाशो न भवति॥ क्षिक्षये स्यययोरिति धातुः॥ तथाचोक्तं॥ कर्कोटकस्य नागस्य
दमयंत्यानलस्य च॥ ऋतुपर्णस्य राजर्षेः कीर्त्तनं कलिनाशनमिति॥ तथा यस्य कथा
निपीय बुधाः स्कथामपि नाद्रियंते इति तथा शब्दः समुच्चयार्थो व्याख्येयः॥ यद्वा अक्षा
पाशास्तैः क्रीडार्थं यस्य विद्यते अक्षिणः द्यूतव्यसनीनोपि नलस्य क्षितिः पृथ्वीराज्यं इ
त्यर्थः॥ एवंविधस्यापि नपतितमित्याश्चर्यं॥ तथाशब्दोत्रापि समुच्चयार्थः॥ एतेनास्य
विघासक्तवः स्थ्यते॥ येन एवंविधः स एव कीर्त्तिः मंडलयशोमंडलं सीतं च [illegible]

तच्छत्रं च सितच्छत्रं स्वेनातपत्रमिवाचरितं कृतं लोकत्रयव्यापि समर्थकीर्तिमंडलं यस्य येन
यस्य वा ॥ पुनः किंविशिष्टः महोज्वलः ॥ महेरुसर्वैरुज्वलः दीप्यमानः ॥ एतेनोत्साहस्फुक्त
त्वं तस्य महानूपरमकाष्ठापन्नः ॥ उज्वलः शृंगारो यस्येति वा ॥ यद्वा महानुउज्वलः शृंगारो य
त्र दमयंत्याः ॥ एतेन पंचनलीमध्ये तस्यैव वृतत्वात् ॥ यद्वा महसा तेजसा प्रतापेन ज्वलय
तीति महोज्वलः ॥ सूर्यपक्षेपि आदित्याज्जायते वृष्टिरिति वृष्टिप्रदत्वेन क्षितिरक्षितृः
सूर्यस्य कथानीपीयसः ॥ यामपि चंद्रविषये तथानाद्रियं ते ॥ तस्य तत्रासामर्थ्यात् ॥ किंभूतः
सूर्यः ॥ स्वेनातनपूर्वीकृतं कीर्तियुक्तं स्फूर्तियुक्तं विस्तारयुक्तं वा मंडलं यस्य सः ॥ स्तोत्रास्वेतच्छ
त्राकारमंडलस्तोत्रि ॥ महसा तेजसा ज्वलतीति महोज्वलः ॥ कीर्तिप्रतापयत्रासोः विस्तारके
दूमेपि चेति विश्वः ॥ महस्तूत्सवतेजसोः इत्यमरः ॥ शृंगारस्तु चिरुज्वलः इत्यमरः ॥ ज्ञातश्चं
द्रसूराः बुधाः इति क्षीरस्वामी ॥ कलिपक्षे निपीयस्थितस्य इत्यध्याहारेण एकं कृत्स्नं कत्वा
स्यपसाचुः नीपीयेति पिङ् पाने क्षितिरक्षीस्वत्रतोच्छिन्येणिनिः ॥ चिंतिपूजीविकमण्यङ्
बुध्यंतइति बुधाः ॥ गुपूधातोः सितच्छत्रितेत्यत्राचारक्विबंतान्कर्तरि निष्ठा च मिष्ट

निष्ठायां सेटीति णेर्लोपः ॥ ज्वल इत्यत्र ज्वलितिकसन्तेभ्यो णः इति पाक्षिकत्वान्न चापचा ॥ अस्य म
हाकाव्यत्वं ॥ सर्गबंधो महाकाव्यमिति लक्षणवचनात् ॥ नायकश्चात्र धीरललितः ॥ निश्चिं
तो धीरललितः कलासक्तः सुखी मृदुरिति ॥ रसश्चात्र शृंगारः स द्विधा संभोगशृंगारो
विप्रलंभशृंगारश्च तस्यापरे रसाः अंगभूताः एवं सर्वत्र ॥ अस्मिन्सर्गे इदमनुमितिया
वद्वंशस्थवृत्तं ॥१॥ रसैरिति ॥ सर्वे वा[illegible]सा व धारणे नवनीतिन्यायात् ॥ स नल एव भूजानिः मही
पतिरभूत् अन्यान्य इत्यर्थः ॥ भूर्जाया यस्येति ॥ जायाया निङ् ॥ सकः यस्य कथा नवभिः शृंगारादिभिः
रसैः षड्भिः सासुधां नीरस्कुर्वतीत्यस्य व्रीडां सुधावधीरणी ॥ सुधायाः षड्रसत्वं व्याख्यान्तरप्रसिद्ध्
या व्याख्यातं ॥ मधुररसयुक्तैव वा ॥ यद्वा यस्य कथा रसैः कृत्वा सुधायाः अवधिं उत्कृष्टां सुधामिति
यावत् ॥ नामीरयति क्षिपतीत्येवं शीला सुधावधीरणीत्यपि पाठः ॥ तत्रापि स एवार्थः ॥ यद्वा
यस्य कथा रसैः हेतुभिः सुधाया आवधिः ॥ एतत्परमं अन्यन्नास्तीत्यर्थः ॥ द्रलोपदीर्घः ॥ एतेन नेत्रा
दिपरित्यागेन नलस्यानुरागस्यौचित्यं ॥ यद्वा श्रोतृजनं भावतीति सुधा वा पुण्यसंचारिणी धी
र्यस्येति मंत्रशक्तिमत्त्वं तस्य सूच्यते ॥ यद्वा नित्यं रागो स्यास्तीति ॥ अनेनोत्साहशक्तिमत्त्वं ॥ भू
जानिरित्यनेन प्रभुशक्तियुक्तत्वं ॥ पुरो शौर्यादिभिः संचितविग्रहादिभिर्वा अद्भुतः आश्चर्यरूपः ॥ अनएवके

ग
नि

रेनस्य वर्णनं युक्तं॥ यद्वा रसारा रितिपदद्वयं॥ यस्य कथाएः कामस्य रसाभः स्थानं सर्वाभिलाषजनि
केत्यर्थः॥ कीदृशः नृलः स्वर्वर्णेति॥ स्वर्वर्णस्य दंडः स्वर्वर्णदंडः एकं च नसितं च नदातपत्रं च एक
कसितातपत्रं स्वर्वर्णदंडश्च एकसितातपत्रं च स्वर्वर्णदंडेकसितातपत्रे स्वर्वर्णदंडेकसि
तातपत्रे स्तः ते न दृदाचरिते वा स्वर्वर्णदंडेकसितातपत्रिते॥ प्रतापस्यावलिः प्रतापावलिः
ज्वलंती चासौ प्रतापावलिश्च ज्वलत्प्रतापावलिः कीर्तिः मंडलं कीर्तिमंडलं ज्वलत्प्रतापावलि
श्च कीर्तिमंडलं च ज्वलत्प्रतापावलिकीर्तिमंडले स्वर्वर्णदंडेकसितातपत्रिते ज्वलत्प्रतापा
वलिकीर्तिमंडले येन यस्य वा॥ यथाक्रमं योजना॥ पूर्वश्लोके स्फुधासितच्छत्रे अविशेष
णोक्ते॥ अत्र तु विशेषेणेत्यपौनरुक्त्यं॥ एवमन्येष्वपि पद्येषु विशिष्टार्थप्रतिपादनादपौनरुक्त्यं द्रष्ट
व्यं॥ अथवा श्रीमन्मानो न्यायो वा द्विजातिवर्णानां दंडः न्यासनं यथासंभवं करदानं वा यत्र॥ तथै
कं सितातपत्रं यस्मिन् तादृशं स्तं तथा ज्वलंश्चासौ प्रतापावलिकीर्तिर्यस्मिन्॥ यद्वा प्रतापाव
लियुक्ता कीर्तिर्यस्मिन् एवं च नृतं मंडलं राष्ट्रं यस्य सः॥ एतेन पूर्वश्लोकेन सहापौनरुक्त्यं॥ प्र
तापस्य दंडत्वनिरूपणात् संकोचः प्रतीयते सा नो चितिः॥ प्रतापस्य व्यापकत्वे विना कीर्तेः

स्यापंकत्वं अनुपपद्यमानं तत्क्रमयतीति वर्णसाम्यमात्रेण चंद्रस्य नीरूपणात्परिहरणीया॥ ज्वरल
दिस्फुरयविशेषणं॥ अन्यथा कीर्त्तेः मंडलशशस्य पूर्वनिपातः स्यात्॥ यद्वा कीर्त्तिप्रतिप्रता
पस्य हेतुत्वाद्भ्व हेतुत्वादं न पूर्वनिपातः॥ २॥ कविरिदानीं स्वमोढ्यं परिहरंस्तस्येव
गुणानुवर्णने कारणमाह॥ पवित्रमिति॥ सेतिसंबंधादितियोज्यं॥ या यत्कथा यत्संबंध
नी कथात्र युगेस्मिन् कलियुगे स्मर्तास्मर्यमाणा सती जगद्भुवनं आसाम स्येन पवित्रं तनु
ते करोति॥ सा यत्कथा आविलां सदोषां मद्गिरमपि रसैः ष्टगौरादितिः क्षालनयेवोज्वली
करणेनेव कथं न पवित्रयिष्यति अपितु पवित्रीकरिष्यत्येव॥ जगद्रूपेक्षया मद्वचसोंतरग
त्वात्॥ तदेवाह॥ स्वसेविनीमेवस्वकथैकेन स्वरामेवस्यर्थः॥ वैन्यं पृथुमित्यादिना स्मर
णमाहात्म्यस्यात्॥ कर्कोटकस्येत्यादिना कीर्त्तनस्य माहात्म्यात्॥ या स्मरतापवित्रयु
नि स्मरणपूर्वकं कीर्त्तिनामद्गिरं कथं न पवित्रयिष्यति॥ यत्रूपेन सेव्यते न सदोषमपि
ते न पवित्रीक्रीयते॥ अन्यदपि मलिनं वस्त्रादि रसेनोदकेन या क्षिलिनात्याभिर्मलीक्री
यते॥ अपि यथापाठमेव वायोज्यः॥ यद्वा पवित्रीकरणे कारणद्वयं अविलत्वमपि अन्य

त्र अन्यराहित्येन स्वसेवित्वं ॥ अपि अन्यश्रेयस्पर्धेन रूपेत्यपि पाठः साधुः ॥ पवित्रमिति पुंवत्संज्ञा
यामिति कर्तरी त्र ॥ इह तु पवित्रमिव पवित्रमित्युपचारात् ॥ क्षालनयेति क्षालेश्शरादेण्य
सिध्यर्थेति पुंरूपा नः ॥ क्षालनयेवेति इवेन निस्यसमासो विना स्पलोपश्चेति द्रष्टव्यं ॥ हृति
यश्लोकेन नस्य पुण्याद्भुतत्वमुक्तं न देवालः ॥ अधीतिः ॥ अयं नलः स्वयं आसना चतुर्दश
स्व विद्यास्व अधितिबोधाचारणप्रचारणैः अधीतिरध्ययनं बोधो र्थज्ञानं आचरणं कर्मा
नुष्ठानं प्रचारणं अध्यापनं ॥ एतैश्चतुर्भिरुपाधिभिः प्रकारैश्च नस्लोदशा अवस्थाप्र
णयन् कुर्वन् चतुर्दशसंकुनः के न हेतुना स्तवान् नजायते ॥ अत्र हेतुर्नास्तीत्यर्थः ॥ च
तुर्दश स्व विद्यास्वचनश्चतुर्दशत्वेन सिद्धे पि तत्करणं पिष्टपेषणतुल्यं त्वादयोगं चतुर्दश
त्वं धर्मः सिद्ध एव ॥ किंच ॥ अधीत्यादिचतुर्भिः प्रकारैः एकैकस्या विद्यायाश्चतुरवस्थत्वेन षट्
पंचाशतां नाव्यमिति चतुर्दशत्वाक्षेपोपितस्माच्चतुर्दशत्वमेव स्वयं ज्ञातासन् कुतः कृतं
वानित्यहं नवेमीति कवेरुक्तिः ॥ इत्याशंक्य पुनः स्वयं वदति चतुर्भिरधिकादशत्वस्य समर्था
च
नैं चतुर्दशत्वस्य ॥ किंतु च नस्तोदशा अवस्था अधीत्यादयो यासां ताः चतुर्दशाः तासां भावः त

त्वं तदहं न जानन् इति नापि तु जानन् एवेति काकुः ॥ एतेन षट्पंचाशत्त्वं निरस्तं ॥ चतुर्भिः अधिकार्दश
त्वस्यापि निरस्तं ॥ यद्यपि स्त्रियस्याध्यापने नाधिकारस्तथापि धनादिदत्वा न्ब्राह्मणद्वारा अ
ध्यापनं युक्तमिति न दोषः ॥ एतेन चतुर्दशापि विद्यास्तस्य स्फुरंतीत्युक्तं ॥ पुराणन्यायमीमांसा धर्म
शास्त्रांगमिश्रिताः ॥ वेदाः स्थानानि विद्यानां धर्मस्येति चतुर्दशेति याज्ञवल्क्यः ॥ बोधशब्दस्यांत
रेण समासं कृत्वा ॥ धीतिशब्देन समासः ॥ अन्यथा बोधस्य पूर्वनिपातः स्यात् यद्वा ॥ धीतेरभ्यर्हि
तत्वात् पूर्वनिपातः ॥ लडिति अनुवर्तमाने पुनर्लट्ग्रहणात् घञ् मास समानाधिकरणे पिश
तानद्योगे च न लोकेति षष्ठीनिषेधाद् शाद् इति द्वितीया ॥ एवं सर्वत्र ज्ञेयं ॥ चतुर्दशत्वमित्यत्रा
पि गुणवचनस्येति पुंवत् ॥ गुणग्रहणेन जातिसंज्ञयोर्निवृत्तिः क्रियते ॥ न शुक्लादि गुणविशेष
प्रतिपत्तिः ॥ तथा च ब्रजति हिंसफलत्वमित्यादयः प्रयोगाः युज्यंते ॥ ५ ॥ ५ ॥ उपवेदानामनंतभाव
मास्थितस्य विद्यांतरसंबंधं वर्णयितुमाह ॥ अमुष्येति ॥ अमुष्य नलस्य विद्यामुखचांदे दलक्षणे
वमनवद्वीपपृथुकृज्जयश्रीयां जिगीषयेव खलु सोऽलाक्षा ॥ अष्टादशानां अष्टदशप्रकारत्वमगार्ह
त प्राप ॥ यद्यपि विद्यायाः अष्टादशत्वं स्वत एवास्ति तथापि साष्टदशविद्याप्य नेन अभ्यस्तेति

संधिः॥ नवानां द्वयम् अष्टादश नवद्वयं च ते द्वीपाश्च तेषां पृथक् कृतिन्नाः याः जयश्रियः जयसूचकाः
श्रियः यद्वा जयंतीति जयाः सर्वोत्कर्षेण वर्त्तमानाः याः श्रियस्तासां जेतुमिच्छया॥ एकया विद्यया एका
द्वीपश्रीर्जेतव्या अष्टादशभिः विद्याभिरष्टादशद्वीपश्रियः सुखेन जेतुं शक्या इत्यर्थः॥ यद्वा अमुष्य
याविता बुद्धिः साष्टादशनामग्राहतेति पूर्ववदन्वयः॥ अष्टादशद्वीपभिन्नजयश्रियां जिगीषया अष्टा
दशानां बुद्धिविशेषाः जाता इत्यर्थः॥ अनया बुध्या अयं द्वीपो जेतव्य इति अतएवामुष्येवरसनाग्रे जि
ह्वाग्रे नर्त्तकीव नर्त्तकी स्फुरद्रूपा नान्यस्येत्यर्थः॥ अष्टादशविद्या अस्यैव स्फुरंतीत्येत्यर्थः॥ नर्त्त
कीपि एकाकिनी रोहस्तादिभिर्षड्भिरंगैः॥ ग्रीवाबाह्वादिभिः षड्भिः प्रंगैः भ्रुनेत्रादिभिः षड्भिरुपांगैः॥ त्वं
र्विस्तारंनीता अष्टादशधा भवति तथा विद्यापि चतुर्दशपूर्वोक्ताः॥ आयुर्वेदो धनुर्वेदो गांधर्वश्चा
र्थशास्त्रकमिति च तस्वः एवमष्टादशद्वीपानामष्टादशत्वमवांतरल्लंकासिंहलंकादिभेदेन
नागवतो न्वंरिस्या॥ अष्टादशद्वीपानिखातयूपइति कालिदासोक्तेश्च ज्ञातव्यं॥ यद्वा नवद्वय
द्वीपानां भिन्नायाः जयाजनिता नलस्य श्रियस्तासां जेतुमिच्छया वेति लुप्तोत्प्रेक्षा॥ नलेनाष्टद
शद्वीपाः जितास्तेन तस्य तावंत्यः श्रियो जातास्तासां जेतुमिच्छया विद्याप्यष्टादशतां प्राप्ता॥ श्री

सरस्वत्योः सहजविरोधात्सपत्न्योः गुणेनेन विस्तरं नीता विस्तारं प्रापिता त्रयी (त्री) संख्याष्टादशत्वे संख्याष्टदश्वा स्वं प्राप्नोति॥ ज्योतिःशास्त्रे त्रित्वं षट्संख्यायां गुणितमष्टादशत्वं लभते॥ अत्रांगशब्देन षट्संख्याग्रहणेन तया गुणनमावृत्तिः॥ यद्वात्र व्युद्धारः॥ अथर्वणवेदः स एकः षडंगानि व्याकरणादीनि गुणा अप्रधानानि पुराणन्यायमीमांसाधर्मशास्त्रायुर्वेदधनुर्वेदगांधर्ववेदार्थशास्त्रलक्षणान्यष्टौ तैः विस्तरं नीता वेदत्रयी यथा॥ अंगानि च गुण्यन्ते षां समाहारेण (णा) गुणनेन॥ अथ च स्वादुरसो स्वादनप्रकारकथनद्वारा मृतासनीलोकस्य रसनाग्रं जिह्वाग्रं नर्त्तयतीति रसनाग्रनर्त्तकी॥ नलस्य सूपकारविद्या अंगानामवयवानां तानां मधुराम्ललवण (ल) तिक्तकटुकषायाख्यानां षड्रसानां न्यूनाधिकसमत्वरूपेण गुणेनाष्टादशतां प्राप॥ यथा मधुरे द्रव्ये मधुरद्रव्यांतरस्य न्यूनं प्रक्षेपः॥ तिक्ते अधिकः॥ अम्ले समः॥ इत्यनेन प्रकारेण सर्वरसानां त्रैविध्ये अष्टादशत्वं॥ पक्षे अंगानां दुग्धदध्यादीनां॥ तथा सूपशास्त्रे॥ दुग्धं दधि नवनीतं घोलघनं तक्रमस्तुयुगं॥ मण्डाट्टकं रुविष्यं विदलान्नं चेति ज्ञेयः॥ कंदो मूलं शाखा पुष्पं पत्रं फलं चेति॥ अष्टादशकं मांसं भेदि द्विंगादि नवं मुद्गादि घटके नवं चेणा।

क्षाण्युक्तानि गिरिस्तनयेति॥

कादिइदंत्रिविधं धान्यं॥ भूचरखेचरजलचरभेदात्त्रिविधं मांसं षड्रसाः॥ कंदमूलफलनाल
पत्रपुष्पमयं षड्विधं शाकमित्येवं धान्याद्यं गणेन विस्तरं नीतेति केचित्॥ एकतावेशेन ब
हुत्वापि तेन लक्ष्यजिं स्वाग्रनर्तकी विद्यास्त्रविद्या॥ गणिकानां द्वीकादीनां गुणेन तद्देशेन विस्त
रं नीतास्त्र षट्दशतां प्राप॥ चतुरंगघनेते हि द्विकत्रिकचतुष्कपंचकैर्मीलितैर्म्य तुर्दशत्वं
ति॥ एतथा चोक्तं यकः चतुष्टयमिलनादष्टादशभेदादिति केचित्॥ सूपशास्त्रविन्नष्टा
दशद्वीपजिज्ञायमित्यर्थः॥ नर्तकीस्यत्र नितिम्नि निषुनृषिस्वाडीपः॥ जिगीषयेत्यत्राप्रस
यादित्यत्र प्रत्ययः॥ विस्तर इत्यत्र शाब्द इति निषेधाद्द्वारेपः॥ त्रयीस्त्रत्रिंशत्संख्येति पक्षे
विस्तर इव विस्तर इति रूपचारः॥ धी॥ ७॥ प्रकारांतरेण तस्य शास्त्रगामित्वं वदति॥ दिशी
शेति॥ नलः शास्त्रारुण्येव हृद्याधिकां दृशं बभार शास्त्रलक्षणां हृद्याधिकां॥ चक्षुर्वि
षयमंतस्याप्यर्थस्य ग्रहणाद्प्यत्राव्यवहितं शास्त्रं तृतीयां दृशं बभार॥ तृतीयनेत्र
सति हित्रिनेत्रत्वं भवतीति शास्त्रस्यार्थ्य तृतीयं नेत्रं दधारेत्यर्थः॥ किंभूतां दृशं कामस्यास्य

४ण

छाचारस्य यः प्रसरः प्राबल्यं तस्यावरोधिनी निवारका ॥ शास्त्रदृष्ट्या पापकर्मण्यप्रवृत्तेः ॥ अ
त एव निजस्यात्मनः त्रिनेत्रावतारत्वस्य त्रिनेत्रस्यैवावतर इत्यर्थः समबोधिका ज्ञापिका ॥
त्रिनेत्रोपि पृथ्वीकामप्रसररूपं हीस्म ॥ तथायमपि शास्त्राभ्यासाल्लोकानां स्वस्य च स्व
च्छाचरित्वं सूचीत्यर्थः ॥ अवनतरो नामो न्नतिः ॥ यद्वा निजः स्वसंबंधिनी स्यः सततजो वा त्रिने
त्रावतारो यस्येति बहुव्रीहिः ॥ तस्य भावस्तत्त्वं तस्य ज्ञापिका ॥ किं भूतो नलः दिगीशावृंदां
शविभूतिः दिगीशाः इंद्रादयो ष्टौ तेषां वृंदानि तेषु अंशेन लेसेन विभूतिर्यस्य ॥ नलस्य वि
भूतिलेशो दिगीशावृंदेषु वर्त्त[illegible]त इत्यर्थः ॥ एतत्कुतः ॥ यतोऽयं दिग्गांईबिलता शि
सर्वासां दिग्नां शासिता ॥ तेनैव कस्याः दिशः ॥ तस्माच्छात्रविरुद्धं किमपि न करोतीत्यर्थः ॥
त्रिनेत्रोपि दिगीशावृंदमंशविभूतिः यस्य ॥ यद्यद्विभूतिमत्सत्त्वमित्विचनाद्धिलोरीभ्व
रस्य चाभिन्नत्वा ॥ सर्वासां दि[illegible]शासिता त्रैलोक्यस्वामित्वात् ॥ यद्वा दिगीशावृंदे अंशेन वि
भूतिरेकादिग्विभागेश्वर्यं यस्य ॥ यद्वा दिगीशावृंदे मध्ये अंशो यज्ञादिनागो यस्य वि[illegible]

शिष्टाभक्तिरणिमाद्यैश्वर्यं च यस्य॥ ततः कर्मधारयः॥ यद्वा दिगीशाः इंद्रादयोष्टौ तेषां वृंदं तत्
स्यांशैः मात्राभिर्विशिष्टा भक्तिर्जन्म यस्य॥ अष्टाभिश्च स्मरेंद्राणां मात्राभिर्निर्मितो नृप इति
मनुः॥ यद्वा दिगीशवृंदांशाभ्यां सौविशिष्टैश्वर्यं च॥ अत एव दिगीशमिश्रीतेति॥ तथा कृति
पये पूर्वार्धेषु नलस्य लोकपालत्वाच्च प्रतीतेः त्रिनेत्रावतारत्वस्य गौणत्वप्रतीतेरसामंज
स्यं॥ मुख्यं तु त्रिनेत्रावतारत्वमत्र संपाद्य॥ समस्तदृष्टावपि लोकपाल इति लोकात्वाच्चैव
स्य॥ त्रिनेत्रत्वाद्धेन ईशानव्यतिरिक्तः सर्वेश्वर उच्यते इति तात्पर्यं॥ शास्त्राणि दृशामि
ति पदद्वये लिंगवचनभेदेपि वेदाः प्रमाणमिति वद्भिन्नलिंगैरेकैव॥ यदुक्तं॥ लिंगसंख्या
विभेदेपि स्यादुपमानोपमेयता॥ विभक्तिः पुनरेकैव चोपमानोपमेययोरिति॥ नलपक्षे
दिगीशत्वादौ व्यधिकरणेन बहुव्रीहिः सप्तमी विशेषणे बहुव्रीहाविति ज्ञापकबला
द्गीकर्तव्य॥ ईशीनेतिनच्च प्रसर इति प्रायुवचनाद्यः प्रसरं नलभत इति प्रयोगतत्
श्रीनानृजवयीति स्मृप॥ गलणा उपसर्गनिवृत्तेः ताच्छिल्ये णिनिः॥ भाष्यकारमतेनु स्मृ
ष्मानन्तदाच्छिल्येपि भवति॥ एवमेवजातियस्तत्रापि ज्ञेयं॥ त्रिनेत्रेति स्फुरत्वादिशानावे॥

अवतरणं अवतरति नावेक्रदोरवित्य पकृस्यलुटो बतुल्लमितीसूत्रादुपरिनाविधिकारस्य
अवेति। त्रस्थितत्वात्प्रवृत्तस्त्रीति घञिअवतार इति स्यात्॥ तस्य संज्ञायां करणाधि
करणयाश्चविध्यातप्रकृतेः दनावात्॥ यद्वा अवतरतीत्यवतरः॥ त्रिनत्रष्योऽवतर
श्येतिपाचाद्यच्॥ विज्ञेयं अवतारस्य वाच्यिकेति नौष षष्ठीसमासः॥ ननु कर्मषष्ठ्यान्त
जकाभ्यां कर्त्तरीति निषेधात् न चैतन्निषेधो वैय्यर्थ्यं कारषष्ठ्याः समासेति कृदुत्तरप
दप्रकृतिस्वरप्रसंगः॥ शेषषष्ठ्यास्तु समासे समासांतोदात्तत्वमिति स्वरविशेषस्य स
त्वात्॥ एतेन जनिकर्तुः प्रकृतिः तत्प्रयोजकोहेतुश्चेति निर्देशो व्याख्यातः अनित्यषष्ठीस
मासनिषेध इत्यन्वयद्वावो चयतीति पचाद्यचीति एवं षष्ठीसमासे समासान्तस्वा
र्थिके निपूर्वस्य दतीति अवतरत्वं बोचयतीति कर्मण्यण् ङीप् पुनिकेण हस्वत्वमिति स
मर्थनीयं॥ ६॥ छ॥ पदेरिति॥ अमुना नलेन चतुर्भिः पदैः चरणैः सत्यास्तेयब्रह्मदमरू
पैः तपोदानयज्ञज्ञानरूपैर्वा सत्कृते च धर्मे स्थिरीकृते निश्चलीकृते सति कृते सत्ययु

गेके जनास्तेपो धर्मं न प्रपेदिरे नत्रापुरपि तु सर्वे धर्मपराः बभुवुः ॥ कृतयुगे धर्मस्य चतुष्पाद
त्वे सिद्धेपि अधर्मस्याप्येकस्य पादस्य सत्त्वांशकाद्यामनेनाधर्मस्यांतिनरां लक्ष्मि करण
द्वारा स्थिरकरणान्विप्रस्ययोपपत्तिः ॥ कुतोवगतमेतदित्यत आह ॥ यद्यस्मात् धर्मवि
रुद्धो ॥ अधर्मोपि न प्रस्थितो धर्मवत्तां दधार ॥ अन्येपि तपश्चकुरिति किमाश्चर्यं ॥ किंकु
र्वन् एकांघ्रिकनिष्ठिकया भुवं स्पृशन् ॥ एकोंघ्रिर्यस्यासा एकांघ्रि कासा चासौ निष्ठा
स्थितिश्च तया एकचरणकनिष्ठिकया वा भुवं स्पृशन् ॥ अत एव कृशो दुर्बलः क्षीणः ॥
धर्माधर्मौ च तुष्पादो धर्मस्य ज्ञानादयश्चत्वारः पादाः अधर्मस्य तद्विपरीता ॥ तत्र कृ
तयुगे धर्मश्चतुष्पाद अधर्म एकपात् ॥ तत्र धर्मात् न्युनत्वमेवाधर्मस्य कृशत्वं अ
ल्पच दीनत्वं ॥ अन्योपि महातपस्वी पूर्वावस्थो भवति ॥ नत्वः कृतयुगे नाभूदिति कश्चि
त् ॥ तत्र सर्वपुराणेषु कृतयुग एव नलेस भवस्यान्कृत्वात् ॥ अवत्रंय भाविभावानां प्रतिका
रो भवेयदि चेतुभिश्चरणैः न त्वेनत्रेतायामपि कृते कृतयुगे स्थिरीकृते सति धर्मस्य प्रति

नियमारोप्येकेनाप्यितत्वात् अतिदुर्बलो भवति ॥

कुर्वन्नकिं न नेन नलेन रामयुधिष्ठिरादिति युगक्रमनिर्देशात्॥ विरुद्धमिति ज्ञातव्यं॥ तन्मतेपि त्रेतो
ननाकृतिः स्फुकृतिः तस्याः स्फुकृतेः धर्मस्य च तुर्भिश्चरणैः नलेन त्रेतायामपि कृते कृत
युगे स्थिरीकृतेसति धर्मस्य बाहुल्यात् त्रेतायुगमपि कृतयुगमेवेति सविसर्गपाठमं
गीकृत्य व्याख्येयं॥ यद्वात्र नेन त्रेतायां चतुर्भिः पादैः धर्मे स्थिरीकृते सति तेन च कृतेकृ
तयुगे जाते सती केतपः न प्रपेदिरे॥ यत्र च तुष्पाद धर्मस्तदेव कृतयुगं॥ तपस्वी चा
नुकंपार्हे इति विश्वः॥ तपस्वीतपः सहस्ता यामितिविनिः॥७॥७॥ यदस्येति॥ अस्य
नलस्य यात्रासु दिग्विजययुपु यद्बले नसैन्येनोद्धतरजः स्फुरन्नाकाशमानोयः प्रतापः स
एव अस्य सत्वादनलोग्निस्तस्य धूमः तस्य मंजिमेवसोदर्यमिवमंजिमा यस्य गत
थाइतो गत्वा स्फुधांबुधौस्फुसमुद्रेपि तितं सदतएव पंकीनवतूकर्दमी नवस्फुधांबुधेः
चंद्रः उत्पन्नः तस्य बचः पंकः चंद्रेपि तिलः गः स एव कलंक इत्यर्थः॥ आसमुद्रयात्रासे नावा
हुल्यं चानेन द्योत्यते॥ स्फुधांबुधिः क्षीरसमुद्रः॥ स्फुधांबुधौ अंगतस समुद्रे इति विष्णुविज्ञो
षेणवा॥ रजसः पंकी नवनूपा ग्यार्थमुक्तं॥ अथ च यसतिनं पानीस्य हेतुतद्न्यस्य नि

निर्मलस्यापि स्वसंसर्गान्मालिन्यं करोति। तदेव दर्शयति। नीति काकुः खलु प्रोत्प्रेक्षायां॥ वर्णद्दृढा
दिन्य इति दृढादेशः। लक्तिगणत्वान्माजिमेत्यत्र इमनिच् द्वितीयाश्रितातीपतितेनि पतित
गावः साधुः॥८॥ स्फुरद्दीप्ति। परैः शत्रुभिरस्त्रनेतोः परेशत्रेवः संगरे संग्रामे निजस्य स्वकी
यस्य तेजःश्रिखिनः प्रतापाग्नेरिंगालमिव दग्धकाष्ठमिवायशो वितेनुविस्तारयामासुः॥
इंगलोनाषश्रवः॥ कविनिर्यशो च वलमयशः श्यामं वर्ण्यते कथं न तस्य तेजःशिखिनः
स्फुरद्दीप्ति। स्फुरत् प्रकाशमानो धनुर्निस्वनः कोदंडशब्दो यस्य एवं विधम्भ्यासोसन
लः स्फुरद्धनुर्निस्वनः तनुर्निस्वनः कोदंडशब्दो यस्य नलस्य घना निबिडाः आशुगा बाणाः ते
षां प्रगल्भा प्रौढा अत्र सह्या या वृष्टिस्तया व्ययीतस्य निर्वापितस्य स्फुरद्धनुर्निस्वनो यस्यामीति वृष्टि
विशेषणं वा॥ तस्य नलस्य॥ अन्यत्पूर्वनृणयद्वा धनुर्निस्वनेन तनोति विस्तारयति नयतेप्राप्नो
ति वा धनुर्निस्वनं ततः स्फुरन् प्रकाशमानः अभ्यासो धनुर्निस्वननं अप्रलंतत्वादयमेवत्र अन्यत्पू
र्वनृप॥ यद्वा स्फुरं तनो धनुर्निस्वनो धनुःसिंहनादो यस्य सः अभ्यासो सः एव घनो मेघस्तस्याशुगा
शीघ्रगामी। नीप्रौढा अशुगेन वायुना वाप्रौढा या वृष्टिस्तया व्यापितस्य विनाशं प्रापि

तस्य निस्वनं तन्वंनतीति निस्वनततः स्फुरद्धनुर्युक्ताः निस्वनततन्वये घनामेघा इति वा ॥ तेजः
प्रधानस्याग्नेरिंगालः श्याम एव नवर्तिः ॥ सर्वे राजानस्तेन जिता इति भावः ॥ आशुगो वा
युविशिखावपि स्युः मरः ॥ निस्वनं तनोतीति निस्वनततनू इत्यत्र पक्षे क्षौगमः क्षोइत्यत्र गमादी
नामीति वक्तव्यमिति वचनासिद्धनुनासिकलोपे तुसंज्ञापूर्वे कृत्याश्यन छिद्रत्नीति दी
र्घीभावं ॥ आता त्वरे इति विगृह्य पंचमीतियोगविभागाद्बहुलं का ह्यो समासे राज दंबेप
र निपाते पारस्करादित्वात् स्फुठिमव्यत्रे च परः आताइति सिद्धं ॥९०॥ अनल्पेति ॥ सराज
घोराह्लो हंतीति नक्षत्रहा स्फुराह्लाहंतानलः नीराजनया आरात्रिके भरराजस्तुभुने।
किंभूतो नलः जयाय विजयो यत्नुवः वलयमंडलप्रदक्षिणीकृत्य स्थितः किंभूतया निरा
जनया स्पष्टया व्यक्तया पुरलोकेरिति शेषः ॥ किंभूतं नुवलयं निजप्रतापैस्त्वकीयैस्ते
जोभिर्ज्वलत्सकाशमानं ॥ किंभूतैः निजप्रतापैः अनल्पानि बहूनि दग्धानि रिपुपुराणि
वैरिनगराणि यैस्तैः अनल्पदग्धारिपुरस्तेच तेअनलाः वन्हयस्तैरुज्वला दीप्यमा

नास्तेभ्रष्विलितरैत्यर्थः ॥ तेजसस्तेजोंतरसंयोगेन भूयस्त्वं भवति ॥ अनलवदुज्वलैरिति वा ॥
यद्वा किंभूतया नीराजनया उक्तरूपविशेषणैः निजप्रतापैरेव सृष्टया नलेनैव कृतया ॥
किंभूतं भूवलयं ज्वलतानूतनलेनेव दीप्यमानं गगनमानमित्यर्थः ॥ अत्र नलवराज्ञामभा
वो नीराजना निराजकरणं ॥ नीराजने इत्यत्र अव्ययं विभक्त्यर्थे अव्ययीभावः ॥ अत्र नभ्र
तितेजो नातु करोतीति एवं तापुच ॥ प्रचुरज्वालितवैरनगराग्निवद्दीप्तैः स्वीयक्षात्रतेजोभिः दी
प्तं भूमंडलं जयाय जेतुं परिक्रम्य स्वैरेव प्रतापैः सृष्टया नीराजनया राजाभावकारणेन सरेजे
इति भावः ॥ जयाय भूमंडलं परिक्रम्य यद्राजाभावकरणं तेन रेजे इति वा ॥ यद्वा ज्वलदस्त्रका
न्तमानं भूमंडलं जयाय जेतुं प्रदक्षिणीकृत्य स्वीयक्षात्रतेजोभिः कृतया नीराजनया आरा
त्रिकविधानेन सरेजे ॥ प्रतापनीराजनयेति व्यस्तरूपकं वा ॥ तत्र ज्वलद्‌ मंडलं जेतुं प्रद
क्षिणीकृत्य सृष्टया अर्थात् नलेनैवेति व्याख्येयं ॥ यद्वा स्वीयतेजोभिः पुरलो [illegible] कैः वा जयस्य
जये आगमेन कृतया जयेति सआयेन शुभावहविधिना हेतुना कृतयेति वा ॥ गमना
गमनयो नीराजनं क्रियत इति लोकाचारः ॥ नलस्य जयं प्राप्तुं कृतयेति वा ॥ जयाय जयाय

गर्भेणेत्सृष्टया निरस्यन्त्यां त्यूदकस्य अञ्जनाऽक्षेपणात् तया वा ॥ यद्वा नलस्य रूज्ज्वलैः शृंगारभू
तैः निजप्रतापैः अनल्पा दिग्धानि अरिपुराणी यास्ताः ॥ अत एव उज्ज्वलैः तीः दैदीप्यमानाऽ
भुवः वैरिदेशान् वलयन् भस्माधीनी कुर्वन् ॥ यद्वा कीदृक् नलः वलयं ● अनल्याः दग्धाः
अरयो यस्मिन् तत् अनल्पदग्धारि अस्मिन् पक्षे पुरा सृष्टयोक्तनये स्वन्वयः ॥ यद्वा किंभूतो
असमंता नलः अनल्पदग्धारिपुरा यो रिपुद्रव्याणि येन स तथा अनुलवदुःसहः ॥ शृंगारः शुचि
रुज्वलइत्यमरः ॥ वलयन् ज्वलदित्यत्र परसवर्णः पक्षांतरे तु भस्मीत्वं राजाघइस्फपसं
ख्यानमिति निपातः ॥ जयायेति तुमर्थाच्चि चतुर्थी ॥ यद्वा स राज्ञो हेतोः नलः अजयालक्ष्म्या
अयविघ्नवेसृष्टया नीराजनया रेजे । राज्ञा विष्णुरूपत्वात् लक्ष्म्या नीराजना क्रीयते
यतो हेतोः ॥ प्रदक्षिणाः प्रकृष्टाः दक्षिणा दानं त्यंये षां ते प्रदक्षिणाः दावन्यास्तेसंति यस्यासौ प्रदा
क्षिणाः ज्योतिष्टोमादायोपस्यसंतीति प्रदक्षिणी अत एव कृतीकर्मकुशलः ॥१०॥ निवारिताइ
ति ॥ अतिवृष्टयः ईतयः प्रतीनृपाल भ्रमीदृशां प्रतिपाविरिणो नृपालाः राजानस्तेषां भ्रमीदृ
शां नायिकास्तासां दृशो नायिकास्तासां दृशोनेत्राणि नूनं प्रायेण नै त्यसुनमुमुचुः ॥ न नमित त
स्फपेक्षायां इति ॥ ईतयस्तस्य राष्ट्रेन संतीत्यर्थः ॥ किंनताः अतिवृष्टयः ते न नले न अखिलैम

हीनत्वेन निवारितां प्रतिषिद्धां निष्कासितामित्यर्थः ॥ किंभूतेन महीनत्वेन निरीतिभावेन निर्गताः ईत
यो यस्मात्तन्निरीति तस्य भावस्तेन गमिते प्रापिते । यतः अनन्यविभ्रमाः न विद्यते अन्योन्यत्र
वा विभ्रमो वासस्थानं यासां ताः ॥ अनेन सर्वेपि अत्रैवोनिहताः इत्युक्तं । यद्वा येन निष्कासश्च
तेन तद्वैरिणमाश्रयति । स्त्रीणां च स्त्रीय एव शरणमित्युक्तं । अतिवृष्टिरनावृष्टिः शल
भाः सुषकाः शुकाः ॥ प्रत्यासन्नाश्च राजानः षडेताः ईतयः स्मृताः ॥ विभ्रम इति दानोपदेशा
स्येति वृष्टिनिषेधः ॥१३॥ ७॥ सितेति । तद्गुणचातुरी तुरीतन्तद्गुणैः रणांगणे यशः पटं वय

भ

ति स्म तस्य नलस्य भैठाः यद्वा सचासौ नटश्च तेषां तस्य वा चतुरीषु दूने पुण्यं सेव तु रीनि
ष्पन्नवस्त्रचेष्ट न दंडः तस्य नलस्य गुणैः तैः प्रसिद्धैः वा शौर्यादिभिर्गुणैः । अथ च गुणैस्तं
तुभिः संग्रामांगणे यशोलक्षणं पटं विस्तारिनभवती निर्मीसीदित्यर्थः ॥ किंभूतैः तद्गुणैः
सितोत्सुभ्र्वं द्रस्तद्वद्वर्णः स्वरूपं येषां धवलैरित्यर्थः ॥ कीदृशीं महानूयो श्रीः खफः स एवं वेमा
वयन काष्टं तस्य सहकारिणी किंभूतं यशः पटं बहुमहापरिमाणं अत एव दिगाण वस्त्रं

॥१२॥ वि

गनाः तासां भंगनामावरणमाछादकं सर्वदिग्व्यापिनं इत्यर्थः ॥ परपरिभविते जस्तन्वतामा
शु कर्तुं प्रभवति हिं पक्षाछेदमग्नेसरोपीति न्यायेन ॥ नष्टैरेव नलशौर्यविनेत्रवैरिणोल
ताः दिग्व्यापियशो नलस्याकारीति भावः ॥ तं तु वायतन्त्र्याः सकाशादियं तुरीअन्याद्द
शीसा प्रत्येकम् अवरकमनेकं पठं वयति इयं तु तद्विपरीतेति रेकः ॥ वेमा पुंसि ॥ वयति व्यति
स्मेति लट् स्मइति भूते लट् ॥ सदूष्ठचरीतिराजनियुधिष्ठिरमू इति वर्तमाने सह इत्येति क्तनिपि
वनोरत्येति ङीब्रोः ॥ चातुर्यमिव चातुरीष्यञ् षित्वात् ङीप् ॥ १२ ॥ छ प्रतिपेति ॥ विरुद्धधर्मै
रपि मिथो विरोधिस्वभावैरपि धर्मैः स्वभावैः नतोन लाङ्छिता नयेन नेतृता विरुद्धत्वं उ
ज्झिता किं ॥ केरिव ॥ प्रतीपनृपैरिव प्रतिकूलराजभिर्यथा नेतृतास्य क्ता ॥ उपजाकारि
त्वं ॥ उपजापोन भेदिः ॥ कुनय एवज्ञातमनत्र्यातगय घस्मात् सनलः ओजसा अमित्रजि
जित् अमित्रान् वैरिणः जयति इति अमित्रजित् ॥ तथाओजसा तेजसा मित्रजित् सूर्य
मपि जयतीति अवर्नत आसीत् ॥ सचारदृग् वर्नत ॥ चारा एव दृक् यस्य स सचारदृक् वि
गताचाराः एव दृक् यस्य सः विचारदृक् ॥ अमित्रजिद्यस मित्रजित् कथं यश्चारदृक्स

॥१२॥

विचारदृक् कथं॥ इति विरुद्धधर्मास्तेः नेत्युच्यते॥ कथं तेजसा मित्रजिष्णुत्वं जितत्वं च तेजसा
मित्रं सूर्यं जयतीति मित्रंजित्॥ तथा विचारः शास्त्रमेव विवेको वा दृक् यस्य स विचारदृक्॥
चार एव दृक् यस्य स चारदृक्॥ अपि चार्थे विरुद्धपक्षेउन्यत्रापि योज्यः॥ अथ च विरुद्ध
त्वं॥ अमित्रजिद्यः स मित्रजित् कथं असुहृदयो जयति स सुहृदं कथं जयति॥ अथ च योऽसू
सूर्यं जयति स सूर्यजित् कथं॥ इति विरोधस्तत्परिहारः॥ पूर्वव्याख्यानं॥ विचारं पश्यतीति
विचारदृक् वा चारैः पश्यंति राजान इति॥ एतेन शत्रुजित्वं तेजस्वित्वं शास्त्रमार्गगामित्वं चा
रेक्षणत्वं च व्यक्तीकृतं॥ एतेन नलस्य विजिगीषुत्वं द्योतितं॥ अरिर्मित्रमरेर्मित्रमित्रमित्र
मतः परं॥ तथारिमित्रमित्रं च विजिगीषोः पुरःसराः॥१॥ पार्ष्णिग्राहस्ततः पश्चादाक्रंद
स्तदनंतरं॥ आसारावनयोश्चैव विजिगीषोश्च पृष्ठतः॥२॥ अरेश्च विजिगीषोश्च मध्य
मो ह्यनंतरः॥ अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुरिति द्वादशराजमंडली॥ ततः इ
ति मित्रत्रस्यपादनत्वं॥१३॥ तदा जस इति॥ विधिविह्नाय दायदा इति पूर्वोक्तं चित्ते मनसि
कुरुते विचारयतीत्यर्थः॥ तदा तदा ज्ञो नो सूर्यस्य विधोरपि चंद्रस्य च परिवेषकेतवान् परि

द्मो रूपं चंद्रमसोऽपह्याति: प्रयोजनाविति न दोजसस्तघस्रसभ्य तेतोरिमोद्धयास्थितो २

पिव्याजात् कुंडलानौ वेष्य यर्थस्य च कं रेखावलयं करोति। इति किं। तदोजसो नलप्रताप
स्य तघस्रसो नलयशसश्च स्थितौ सस्यौ इति वा। सूर्यचंद्राभ्यां यत्कर्त्तव्यं तन्नलेनेजो
यशोभ्यामेव क्रियते। सूर्यतुल्यः चंद्रतुल्यश्चेत्यस्मिन्नूयं। परिवेषस्य कादाचित्कत्वाद्यदा
३ यदा स्कृत्तं। केतवादिति भावेयु वादित्वादण्॥ व्याख्यातस्य ग्रंथस्य कुंडलनया लो
पः क्रियते॥१७॥ तस्य वदान्यत्वं वर्णयति। अयमिति। स नृपो नलः अर्थिजनस्य याच
कजनस्य ललाटे जाग्रती स्फुरंती वैधसीं ब्राह्मीं इति लिपिं मृषा मिथ्या न चक्रे किंतु॥ षष्ठ्यां
ब्राह्मणा लिखितत्वात् सत्यमेव चकार। इति किं। अयं याचकजनो दरिद्रो निर्द्धनो भ
विता भावि इति लिपिः॥ नहि तस्यानौदार्यत्व प्रतीतेः कथं वदान्यत्वमित्याशंक्योक्तिः। श्यो
नं ग्यारसमाधत्ते॥ किं कृत्वा। दारिद्र्यं दरिद्रत्वं प्रणीदारिद्र्यस्यैव दरिद्रतां राहित्यमित्य
र्थः तां प्रणीय निर्माय वैधसीं लिपिं मृषा न चकारेत्यर्थः॥ युतोल्पितं कल्पयाद्पः अल्पि
तः अल्पीकृतः कल्पपादपः येन कथं। कल्पवृक्षो याचितमेव ददाति नलस्त्वयाचित
मपि। अतो वदान्यतम इत्यर्थः॥ नलराज्ये कोपि दरिद्रो नाभूदित्यर्थः॥ यद्वा कः कल्पितं घ

नंदत्याश्चाशीर्लिपिंमिषान चक्रे अपि तु कृतवानेवेति काकुः॥ अर्थितेति तत्कुरोती र्ण्यतास्मि
ष्टा॥१५॥ प्रकारांतरेण पुनरपि वदान्यत्वमाह॥ विभज्यतेति॥ तेन नलेन तस्मात्कार
णात् द्वास्थां फलस्यां त्रागास्यां बद्धाः संयुताश्चिकुराः केशाएव निजस्वीयमयशासः अ
कीर्तेः युगं आमानि अमन्यत॥ त्रिरसिसीमंतस्यो न्नयनागेस्थिताः केशान् नवंतीति
अकीर्तिद्वयं॥ यद्यस्मात्सया नलेन मेरुः हेमाद्रिर्विभज्य खंडशो विधाया र्थिसात् या
चकाय नोऽर्थ्य धीनं देयं वा न लकृतः तथा सिंधुः॥ समुद्र उत्सर्गजलव्ययैर्दानक्रि
यमाणोयेजलव्ययाः जलदानानि तैर्मेरुर्निर्जलदत्त्वेन कृतः॥ दानं हि जलपूर्वकं भव
ति॥ यद्वा मरुः उत्सर्गजलव्ययैः सिंधुर्नकृतः॥ तदाकरणलक्षणायश्यशः स्थानेहि फा
लबद्धाः केशाएव जाताः इत्यर्थः॥ सर्वस्वदानेपियावदेनं तद्वयं न कृतं तावन्न तुतोषेति भा
वः॥ एतेनास्यायशोलेशोपिनास्तीति ऽपि सूचितं॥ लौकिकोक्तिरपि अपि कीर्तिः त्रिरसि
स्थितेति॥ अर्थिसादित्यत्र तदधीनवचनेदेयेत्राचेतिसातिः॥ फालशाब्दाः पात्रादि॥१६॥
त्रजस्त्रमिति॥ अयं देवो राजा नलः दिने दिने प्रतिदिनमुदयमेधिकामभिवृद्धं दधौ॥

किं कुर्वन्॥ कविना व्यक्तं बुधेन विदुषा वैयाकरणेन वा समं सह मुदेव हर्षेणैव समयं का
लं नयन् गमयन्॥ किंभूतेन कविना बुधेन च॥ अजस्रं सर्वदा॥ अभ्यासे काव्यकरणव्य
सने शास्त्रमनने व्यसनं उपेयुषा प्राप्तवता॥ अभ्यासमिति पाठे नलसान्निध्यं॥ कीदृक् स
पटीयान् कविताद्यभ्यासवान् अक्षपादिसमर्थश्च पुनः किंभूतः दिनेश्वरश्रीः दिनेश्वरः
सूर्यस्तद्वत् श्रीः शोभा यस्य॥ अत एव दिनेश्वरोपि कविना शुक्रेण बुधेन चंद्रपुत्रेण सह प्रा
तरादिसमयं नयन् पटीयान् तेजस्वी तमोनाशसमर्थः प्रतिदिनमुदयं धत्ते॥ बुधशुक्रौ स
दा पूर्वोत्तरात्रिस्थाविति ज्योतिर्विदः॥ यद्वा ताभ्यां समं समयं सम्यक् अयं श्रुतावहं विचिं
यन् प्राप्नुवन्॥ अयं प्रतिदिनमुदयं नदधावपि तु दधावेव॥ अभ्यासो व्यसनेऽ किंतिचेति
विश्वः॥ अजस्रमिति नञ्पूर्वो जसे नमिलंपीतिरः॥ उपेयुषेति उपेयुवान् नाश्वानूनुश्वा
नयेश्चेति साधुः॥ उपेयुषेत्यादौ समभिति सहार्थयोगे तृतीया॥ १६॥ तस्य सामुद्रिकलक्षण
माह॥ अपीति॥ किमिति संभावनायां वेधसा ब्रह्मणा तस्य नलस्य पदं चरणद्वितीयोरूर्ध्व
रेखया लक्षणभूतया किंतं चिह्नितं किं॥ इति किं॥ इदं नपदं कमलप्रवालयोः पद्मपल्लवयोः

१३

कमलविद्रुमयोः वाच्योविधानात्॥ अरुणत्वस्निग्धत्वमृदुत्वैरधः करणात् धिःकारात्मत्॥ तथाप्र
तापेन अखिलक्ष्म्या भुजां समस्तभुजां शिरस्कदानात् स्थापनात् क्रमेणोर्ध्वं उत्कृष्टमुपरीच पुरा भ
भविष्यदर्थे × वति न भविष्यतीति तियावत्॥ पुरा निपातयोः लट् इति लट्॥ राज्ञां शिरस्कदानमाक्रम्य वर्त्तनं॥ १८॥
जगदिति॥ तस्य वयः संधिमात्॥ अयं नलः शैशवशेषवान् शैशवे शेषस्य शेषं विद्यते यस्य एवं भू
तो षोडशाब्ददेशीयः अगतः समग्रस्य नृमंडलस्य समग्रं जयं विजयं प्रणीतवान्॥ तेन च
विजयेन केशरीणां डाहिरमहं अक्षयं परिपूर्णं कृतवान्॥ तेन च इतिपादेनानुषंगित्वं लक्ष्म्या घोत्य
स्व ते॥ दानमूरं स्य तस्य पूर्वमेवोक्त लाङ्खा डारगृहं सूचितं॥ दमयंती लाभस्त्ववसिष्यते॥ अथ
जगज्जयानंतरं यौवनं तारुण्यं अस्य वपुः शरीरं तथा आलिंगत् अयं यौवनं प्रापेत्यर्थः॥ श
रीरं कर्त्तृ यौवनं कर्मन्नूतं प्रापेति वा॥ अनेन नलवपुषे वयौवनमलंकृतं नतु तेन॥ यथा र
तीशस्य कामस्य सखा मित्रं ऋतुर्वसंतः वनं अभिलिष्यति॥ यथास्यतत्र वरमणीयं वनं वसंतं
उद्दीपयति तथा यौवनं कर्त्तृ शरीरं कर्म उद्दीपयतीस्म॥ शरीरमपि सोदया कामस्य मित्रं॥ त्वदं
रतीशस्य ऋतुरिस्यत्र रुस्य कइति प्रकृतिभावः॥ १९॥ शरीरवर्णनमेव प्रक्रमते॥ नदंघ्रिणा

तच्चरणेन पद्मेषु कमलेषु घृणा जुगुप्सा दया वा ऽयारिक्का काशि पदेन नलचरणात् नलचरणस्य वा
मायेषां सामुद्रिकलक्षणत्वेन पद्मिसातीनि वा पद्मानि मत्स्यो जालत्वेन यानि सलक्ष्मीकानि मामा
त्रित्वया निवर्त्तितैः सहस्पर्द्धमिया कथं कार्यात्क्रमेण स्यन्नोनिःशोभा स्याज्जुगुप्सा आश्रितत्वाच्च
करुणा॥ पद्मात्तच्चरणशोभा अधिकेति भावः॥ पल्लवे प्रवाले तच्छयच्छायायाः पल्लवोपितस्य न
लस्य शायो हस्तस्तस्य छाया कांतिस्तच्छयच्छायं तस्य पल्लवो लेशोपि क्व कुतः॥ यतः पदोत्तवः
पल्लवः॥ शरीरनिकृष्टावयवचरणशोभालेशो यत्र वर्त्तते॥ तत्र शरीरोत्कृष्टावयवपाणिशो
भालेशोपि कथं॥ हीनेन सह साम्यायोगादित्यर्थः॥ एतेन पल्लवात्करशोभाधिकेत्यर्थः॥ किं
च शारदः शारदि भावः निर्मलः पार्वणः पार्वणि पूर्णिमायां भवः संपूर्णकलः शर्वरीश्वरो
निशानाथश्चंद्रः तस्य नलस्य आस्यं मुखं तस्य दास्येपि सेवकत्वेपि अधिकारितां पात्रत्वं न
गतः न प्राप्तः॥ किमु तत्साम्यं चंद्रस्य शारत्पूर्णिमारात्रियोगाद्रमणीयत्वं॥ आस्यं आस्यं तु
स्यतएव॥ शारदत्वादर्ध्वत्वाद ग्रेरस्यातु मत्रा क्वतात्साम्यं नलेनेडुनि वो॥ रमणीयनाय
कस्य रमणीयेनैव दासेन भाव्यं॥ न चास्य पूर्वोक्तप्रकारेण तुल्यत्वं अतो दास्य समर्पिन

प्राप्नोति भावः ॥ निर्मलत्वात्संपूर्णत्वात्कलंकस्यस्पष्टत्वादितिवा ॥ स्त्रीप्रधानत्वाद्वा ॥ अस्य चतुःषष्टी
कलत्वात् नतथा चंद्रस्येत्यर्थः ॥ गौरं दीपीतमुद्रेस्याच्छाल्लिंनेप्रतिभेनवो ॥ तछ्च यच्छायेति विभाषा
से ॥ नेसादीनानपेसकत्वं ॥ गारद इति भावार्थे संप्रचिवल्लेत्यणपार्विक इति भावार्थे कालानूः ॥
पार्वण इति पाठे संबंधेणू अनि-तिप्रकृतिभावः ॥ २० ॥ प्रकारांतरेण सामुद्रिकलक्षणवत्त्वमा
ह ॥ किमित्ति ॥ विचित्रैस्तारागणांकपटेनमिषेण सार्द्धत्रिकोटीरेषाभिः अस्य नलस्य गुणान्
शौर्यादीन् किंनाजीगणन् अपितु गणयामासेति काकुः ॥ गुणगणनया गुणकेन अक्षणा
रेखा एव लिखिताः न तु रोमाणि ॥ अनेन सर्वगुणवत्त्वं तस्य द्योतितं ॥ दोषराहित्यमाह गजगत्ल
ता अस्त्रलग रोमकूपौघमिषात् रोमकूपसमूहव्याजेन अन्यबिंदवः दूषणानां अन्यानि अना × दूषण
वाः तत्स्थापकाबिंदवश्च न कृताः किं अपितु कृता एव ॥ यत्र किमपि न तत्र स्योतिवैदिः अन्य
सूचका बिंदुः क्रीयते ॥ तथा रोमकूपा अपि वर्तुलबिंदुत्वेनोप्रेक्ष्यंते ॥ अयं रोमकूपसमूहो
न तु किंतु दोषराहित्यसूचकाः ॥ अन्यबिंदव एव लिखिताः ॥ तिस्रः कोट्याई कोठी चे या निरोमा
णिमानुष इतितावंतः ॥ कूपाइति रोमैकैककूपके पावर्थिवा नामितिसामुद्रिकलक्षणे हंसः च्यते ॥

ण्यंतां च्युडिंडिमे इत्युगुणु ॥२७॥ अमुष्येति ॥ अमुष्य नलस्य दोर्भ्यां भुजाभ्यां अरिदुर्गलुंठने अ
रिणां दुर्गाणि गिरिप्राकारास्तेषां लुंठने बलाद्ग्रहणे क्रियमाणे सति अर्गल दीर्घपीनता अ
अर्गलस्य दीर्घत्वं च तनुहीनत्वं च तस्य भावः तत्ता कर्मधारयो द्वंद्वो वा ॥ सा गृहीता ननु ॥ ध्रुवं प्राये
ण वा ॥ तत्र च तत्रैव अरिदुर्गलुंठने एव अमुष्य उरःश्रिया वक्षस्थलशोभया गोपुरे स्फुरद्दी
प्यमानं यत्कपाटं तस्य दुर्धर्षता कठिनता तिरःप्रसारिता विशालता च गृहीता किं ॥ अनेन तस्या
जानुबाहुत्वं व्यूढोरस्कत्वं अनाकलनीयत्वं च ध्वनितं ॥ लुंठने समर्थ एव अग्रणीर्भवति ॥
पुरोवर्त्तीसारं वस्तु ग्रहणाति ॥ द्विष्कंभे अर्गलं ना इत्यमरः ॥ पुरद्वारं च गोपुरमिति च ॥ उ
भयत्र कर्मधारयो नुत्तु ॥२८॥ स्वकेलीति ॥ तन्मुखस्य प्रतिमा स्वरूप उपमानं चराचरस्थाव
रजंगमात्मके जगति नास्ति ॥ चंद्ररूपमुपमानं चेत्तत्राह ॥ कथंभूतस्य तन्मुखस्य स्वेनात्मना स्व
कीयाकेलीक्रीडा तस्याः लेशो लवस्तत्र यत् स्मितं तेन निर्जितः इंदुर्येन तत् ॥ तथा निजः स्व
कीयो योंशो भागस्तद्रूपे ये द्वे नेत्रे ताभ्यां तर्जिता निर्भर्त्सिता अंघःकृतापह्वानां संपत्स
मृद्धः सौभाग्यं याये न चंद्रपद्मातिरिक्तमन्यदुपमानं नवष्यतीति चेत्तत्राह ॥ अन्नद्वयीति चे

तत

राचरविशेषणं॥ तयोश्चंद्रपद्मयोर्द्युती तद्द्युती तस्याजित्वरं जयनशीलं नविघनेन द्युती जित्वरं सुं
दरांतरमन्यसुंदरवस्तु यस्मिन्॥ जगति मुखस्योपमा न द्वयं चंद्रः पद्मं च॥ तदतिरिक्तं वस्त्वंत
रं नास्ति॥ तद्द्वयमेतन्मुखांशुनाः तेनास्मितेन दृग्गाचजितमिति समग्रस्य तन्मुखस्योपमानं ना
स्तीत्यर्थः॥ चराचरस्या जगतीति विश्वः॥ जित्वरमिति इण्॥२३॥ पूर्वोक्तमर्थं पुनरप्याह॥ स
रोरुहमिति॥ तस्य मुखावयवभूतया दृशौ वसरोरुहे पद्मं निर्जितं तस्मिन्नेते नैव विधोरपिचं
द्रस्यापि श्रियः जिताः परं पद्मं चंद्रातिरिक्तं अन्यन्न व्यसुंदरं वस्तु कुतः॥ कुत्र स्यं॥ अत एव
तदाननस्य नलास्यननस्योपमिता बुपमाने महीयसी कवीनां दरिद्रता अहो महदाश्चर्यं॥ अ
संतावडति त्यर्थः॥ महीयसामिति पाठे कवीनां महती दरिद्रता॥ अव्ययमिति अव्ययेयेति नि
पातनं॥ यो यस्मात् निकृष्टो भवति स तेन दृष्टो वर्त्यते॥ स्मितेन स्वस्योपहासेनैव बाधः वे
यनस्योपहासं क्रियते वा॥२४॥ स्ववालेति॥ एवमाक्षेप्यार्थः॥ चमरीपशुरपि पुनःपुनः पुच्छविलोलनच्छ
लात् पुच्छस्य विलोलनं चालनं तदेव व्याजो मिषं तस्मात् स्ववालभारस्य स्ववालाः केशास्ते
षां भारः समूहः तस्य अनागसे अपराधाभावाय लचापलं॥ बालश्चपलो भवतीति तस्य चा

लौकिकोक्ति

विशेषण

नि

नैष॰भ॰
१७॥

टी॰

पलं अपराध्यायनेतिमात्रायथाग्रंसतीं॥ तद्भ्रमरीलांगुलचलनव्याजेन स्वबालजारस्यापराधो
नास्तीति कथयती कथमपराधत्वं तस्येत्यत आह॥ किंभूतस्य स्वबालजारस्य तदुत्तमांग
जैः समं तस्योत्तमांगे शिरसि जाताः केशास्तैः सह तुलाभिलाषिणः तुल्यां साम्यं अभिलष
ति एवं शीलस्तस्य स्वयं बालः सन् महता साम्यमिच्छतीति तदातन्मानावालेनाज्ञानादीदं
कृतं क्षाम्यतामिति वदति॥ तद्भ्रमरीबालजारस्येति बवयोरभेदात्॥ उत्तमांगजैरितिस
मम्यां जनेडः॥ अमूर्द्धमस्तकादिप्राप्तोप्यलुक् बाहुलकान्न भवति अनागस इति क्रियार्थोपेत्या
दिना क्रियया यमभिप्रैति स्यादिना संप्रदानत्वे वा चतुर्थी च पलशब्दस्य गुणवाचित्वात्पलमि
तिष्यञ्नाव्यं तथा पृथ्वादित्वादणि चापलमिति साधुः॥ २०॥ मरीन्नत इति॥ तत्र नृपेण
नले जगत्त्रयीभुवां त्रिलोकीसमुत्पन्नानां सुन्दरीणां पूर्वोक्तेन प्रकारेण द्विधा मन्मथवि
भ्रमः कामविभ्रमो नवनूतनो जातः॥ विशिष्टो भ्रमो विभ्रमः विलासश्च॥ कामस्य विशिष्टो
भ्रमः कामजनितो विलासश्च॥ तदुभयं क्रमेण सपेक्षायां यथाक्रमेण॥ यस्यामतीन्नता

राज्ञः नलस्य मन्मथप्रियाकामसदृशो नले नस्वीयांतःकरणे मदनोयमिति भ्रांतिः॥ तथा नि
जस्य स्वस्य चित्तस्यांतःकरणस्यतं नलं प्रति इच्छया रस्याभिलाषेण कामजनितो विलासः
कटाक्षादिः॥ इति कामजन्यविभ्रमहेतुर्विभ्रम्यं। मृहीन्तन्त इति संबध्यते षष्ठ्या मन्मथपदतान्व
यात्॥ न पइति विषयसप्तम्या मन्मथविभ्रमपदेनान्वयात्॥ न पौनरुक्त्यं॥ चौ परस्परस
मुच्चये॥ जगत्त्रयीभुवामिति सामान्योक्तेः पतिव्रतादिरहितानामिति ज्ञेयं॥ एवं नकानि
नीत्यादौ श्लोके ज्ञेयं॥ यद्वा मन्मथप्रियेत्यादि चकारमेव कारार्थं व्याख्येयं द्वितीयसमुच्चया
र्थं व्याख्येयः॥ पतिव्रतानां मच्चेन्मथोयमिति निराभिलाषो विशिष्टो भ्रमो जातः अन्यासां
तु तं प्रतीच्छयापीति हेतुर्विभ्रम इति अनौचितिः परिहरणीया॥ विभ्रमो भ्रांतिहावयोरिति
विश्वः॥ मननं मनस्तत्तस्यास्तस्यासजन्यं ज्ञानं मन्मथ इति निमन्मथः॥ मल्लविनजादित्वात्कः॥ २६॥
इदानीं क्रमेण देवांगनागमर्त्यांगनानां कामविभ्रमं श्लोकत्रयेणाह॥ निमीलनेति॥ त्रिदशी
भिः देवांगनाभिः यो भ्यासनरो अभ्यासातिशयः निमीलनभ्रंशजुषा निमीलनस्य नेत्र
संकोचनस्य भ्रंशः अभावः तं जुषतीति निमीलनभ्रंशजुषा दृशा यादृशानं नलं निपीय सादरं

दृष्टा अर्जितः स्तः अमुस्मिन् दस्युः तमस्यासनरं निमेषनिःस्वैर्निमेषदरिद्रैः लोचनैरद्युनाप्यघा
पिबिवत्पुष्णन्नेमकटयंति देवानां स्वर्गं वा निमिषत्वेन नलावलोकने उपक्षीणमिस्फलत्वेक्षा॥ यदत्ते
तमस्यासं तत्कदापि न विस्मर्यते॥ त्रिदशानिति पुंयोगलक्षणे वा ङीप्॥२८॥ अदइति॥ चक्षुः
श्रवसां नागानां प्रियाः स्त्रियः नलेन तन्निमित्ते आसन्न स्तनदृशोर्द्वयं इति एवं किंप्रका
रेणाहतादामृनसास्त्कं तिस्मनिंदीतिस्म॥ च इति किं अद इदं नोस्माकं दृशोर्द्वयं नदाकर्णितं नृ
लमाकर्णयति एवं शीलं सत्फलाज्य जीवितं फलेनाघं जीवितं यस्य स फलजीवितमित्यर्थः
तदावीक्षितं नलं न विक्षते एवं भूतं सत् अफलं निष्फलं॥ इति पातालेस्थितत्वात्नलाकर्ण
नं भवति न तु वीक्षणं॥२९॥ विलोकेति॥ मर्त्याभिः मानुषीभिः अमुष्य दर्शने अवलोकने नि
मिषनिर्मितानेत्रनिमीलनरचितो विलंबोपि नालंभिनत्राप्रापि॥ किं न ताभिः अजस्त्रं भावनाव
लात् अजस्त्रं निरंतरया भावनावासनाचिंतनं वा तद्दर्शनं दत्तं नलं नेत्रनिमिलने सुप्तिने सं
कोचे स्वप्ने पि सस्फ विलोकयंति निःप्रत्ययं नित्यानि॥ योहि यं स्मारतित्तिस नेत्रगोचरो भवेपितमेव

पश्यति ॥ मर्त्यासिरिति यापयत्यालङ्कीपृ ॥ २९ ॥ इदानीं पतिव्रताव्यतिरिक्तानां सर्वासामपि
मुग्धादिक्रमेण नले अनुरागमाह ॥ नेति ॥ का स्त्री निशान्ते स्वप्नगतं स्वप्नप्राप्तनलं न ददर्श ॥
अपि तु सर्वापि ॥ का च गोत्रस्खलिते नामव्यत्यये नाम न्नातीत नलं न जगाद ॥ अपि तु सर्वापि ॥
का च परिरंतसंभोगे तदासत्ताध्यात एव तस्य नलस्यात्मा स्वरूपं यस्य तस्य भावस्तत्तां नल
स्वरूपवत्त्वं तया ध्याता धवः प्रियो यया एवं न तासती का वा स्वमनोजबोद्धवं स्वस्य मदनो
द्रुतिं न चकार अपि तु सर्वापि स्वप्रिये नलज्ञानवत्त्वारेमेत्यर्थः ॥ क्रमेण मुग्धादीनां नले चि
न्तासंगोद्दीपितः ॥ बाल्यो युवा न यो नलमेव स्वप्नगतं ददृशुरित्यर्थः ॥ नाम गोत्रं कुलं गो
त्रं गोत्रस्कधरणीध्र इति यादवप्रकाशः ॥ ३० ॥ इदानीं अन्यस्त्रीणां तदयोग्यत्वप्रतिपाद
नपुरःसरं नैमीप्रसंगं करोति ॥ श्रियेति ॥ कयापि स्वरूपया ज्ञात्वा नैमी विहाय सत्त्वात् दर्पणः अ
दर्शः श्वासमलीमसः श्वासेन मुखवायुना मलिनो न कृतः ॥ अपि तु नैमीव्यतिरेकेण सर्वा
भिरपि कृतः अयोग्यत्वात् किं न तो दर्पणः तं नलं चित्राद्दो अलोकय इति विचार्य स्वं आत्म
स्थानमपि दृक्षितु अवलोकयितुं करे हस्ते धृतः ॥ इति किं श्रियापि न पात्रस्य नलस्यपश्य

तं योग्या सहस्रीस्यामिति काकुः॥ किं न तया कया अत्र पदपर्यागतवर्गया तमालोक्य गतगर्वेति
वान्वयः॥ नैमी सत्कास र्वापि गतगर्वा जातास्यर्थः॥ प्राप्तरूप स्वरूपाभिरूपाः बुधिमनो
ज्ञयोरित्यमरः॥ विहायेति ल्यबंतो स्वरूपो निपातो विनार्थे द्रव्यः॥ ३७॥ नलेनैमीमनो मि
लाषमात्॥ यूथेति॥ वयसा पक्षिणा गरुडेनेव उह्यमान प्राप्यमाणः मदनः प्रद्युम्नः प्रस
ह्य लात्कारेण वैरोचनीज स्य पुत्तनं बलिपुत्रस्य बाणस्य शोणितपुरं नगरं यथा गरुडेनैव
वेशितः प्रवेशितः॥ तथा वयसैव तारुण्येनैव विदर्भजाया दमयंत्याः मनः कर्मप्रस स्वश्रे
ष्ठ समयं अंशां शमदनः प्रवेशितः खलु वाक्यालंकारे प्रसिद्धो वा॥ किं न ते न गरुडेन भोगभो
जिना भोगसर्पशरीरं भुंक्ते एवं शीलः तेन तारुण्यपक्षे भोगस्र खं भुंक्ते॥ भोजयति वातच्छी
लेन किं न तं पत्तनं अनलेनाग्निना वरुद्धसमंततो व्याप्तं॥ भैमीमनःपक्षे नलेन संबंध्यमा
क्रांत॥ चित्रोदेष्टे ध्यतच नलं मनसि ध्याय कामपीडिता जातेत्यर्थः॥ कामः कीदृक् तारुण्यचि
न्हे रुह्यमानस्तद्वर्यमार्गः॥ प्रसह्येति हठार्थे व्ययं पक्षे सहेत्यण्॥ बाणास्त्र कैरैन्यावि वार्हे

नि

निरुद्धे श्रीकृष्णनप्तरि बाणेनावरुद्धे नारदवचनात्प्रद्युम्नसहितः श्रीकृष्णो गरुडमारुह्या
निरुद्धमोचनार्थं शोणितपुरं गतः इति विष्णुपुराणं॥ भोगीति पाठे भोगिनः सर्पान् भोग
युक्तान्वा विलासिनश्चेति॥ खगबाल्यादिना वयस्यस्मरः॥३२॥ तमेव प्रकारमाह॥ नृपइ
ति॥ सा भीमनरेंद्रस्य नंदिनी दमयंती तस्मिन्नृपे नले मनः विशेष्यान्यस्त्रीभ्यः सकाशाद्दति
न्नायेनान्यनृपेभ्यः अरूप्यवादिदेशनिदर्यो॥ किंभूतेन नृपेन निजरूपसंपदा स्वकीयसौंदर्याभि
ख्यानां अनुरूपयोग्यत्तथा बलतुऽनेकवारं प्रतिश्रवणंगोचरंगते प्राप्ते॥ किंभूतं मनः मनोभ
वस्य कामस्याज्ञायाः एकमुख्यवश्यंवदं प्रवणं कामाज्ञाकारकमित्यर्थः॥ मदनायत्तत्वान्न
ले एव संलग्नमित्यर्थः॥ नृपं च संपदश्चेति वा बहुत्वा इति संख्याकवचनात्॥३३॥ उपासनमि
ति॥ सा भैमी स्वावसरं सत्का दिने दिने प्रतिदिनं पितुः पासनां सेवामेत्यागस्य बंदिनामव
सरेषु समयेषु रज्यते स्म अनुरक्ताबभूव॥ तेषामवसरे नलाकर्णनसंभवादित्यर्थः॥
तदेवाह॥ तेषु वंदिषु प्रति नृपतीनन्यान् राज्ञः पठत्सु सत्सु इति पूर्वकं वदत्सु सत्सु भैमी न
ले श्रवणवतीसती अलं अत्यर्थं विनिद्रारोमाऽजनी उत्पुलका जाता॥ श्रवणानुरागः सा चिको

बाल

नावश्यं दर्शितं ॥ उपासनेति। उपासनमर्थे नियुक्त॥३४॥ कथेति। मिथः परस्परं कथानुषंगेषु कथा
प्रसंगेषु सखीमुखात् लक्षणे पि विश्रुते विषये नल नाम नि(श)म्यादमयंत्याः कृते सति अनया
भैम्या मुदा हर्षेण तस्य नलनाम्नः आकर्णने श्रवणे सज्जीतसरौकर्णौ यस्या एवंभूतया
अभूयत जातं। किंपुनर्वाच्यं नलरूपवर्णने सज्जकर्णत्वं ॥ किंकृत्वा अन्यकथांतरं कार्यां
तरं वा द्रुतं झटिति विधूय परित्यज्य एतामयि[illegible]स्नेहान्नलराजकथामेव कथयंतीं ज्ञात्वेस ति
र्थः ॥ तन्वेति विरहव्यथया कृशा चासौ अनयेति ति न्यायेर्थ ॥ स्मरेनेपदं ॥३५॥ स्मरादिति। सा
भैमी इति पूर्वोक्तप्रकारेण पुनस्तत्क्षणानुसूक्ष्मतासख्यादिना जनेन प्रयोज्येन नैषधं नल
तदास्पदे मदनस्थाने निदर्शनं दृष्टांतं अस्य षेच ये तु स्थापयामास ॥ इतिकिंहेतुन [illegible]परा
स्तोः परागतो आसत्वात्स्य तस्मान्मरतादत एवानिमेषलोचनान्निमेषरहितलोचनात्
स्मरात्कामाद्दहं बिभेमि ॥ नन्तु स्माद्विन्नं अन्यं दृष्टांतमुदाहरवदेति ॥ तेनपृष्टोसति नल
दृष्टांतेन स्थापयामास ॥ असौ राजा कामोपम इति जनो यं कंचन स्तौति तदा भैम्याज्ञया।

काममुपमानं सत्कान्नलमुपमानं करोतीत्यर्थः॥ अथ न्यस्योपमानस्याभावान्नलमेव दृष्टान्तं जनो द- वा
दातीत्येति भावः॥ तस्मात् स्मराद्भिन्नमित्येकं पदं वा॥ देवत्वादनिमेषत्वं मरतत्त्वे नोत्प्रेक्षितं॥
मरतस्य राज्ञो देहस्थाने ऽन्यो निषिध्यते॥ स्मरादिति भिन्ने संपादनं॥ आस्पद इति आस्पदं प्र-
तिष्ठायामिति साधुः॥ नैषधामिति निषधानामयमिति संबंधमात्रेण प्रकारादिना चस्व-
स्वामीसंबंधाधिगतिः॥ निषधानां राज्ये इत्यर्थः तु जनपदलक्षणाञो वाच्यके स्यादिनालु-
रुणादिति णयनैषध इति स्यात्॥२६॥ नलस्येति॥ अनया भैम्या निषधागता निषधदेशा-
दागताः दूतद्विजबंदिचारणाभ्यारविप्रस्तुतिपाठकदेशांतरश्रमणजीविनो नलस्य गुणानू-
सौंदर्यादीननुवर्तादेशो कोराज्ञा कीदृग्गुणः कथं प्रजाः पालयतीति मिषेण व्याजेन पृष्टाः॥
अथ प्रश्नानंतरं तत्कीर्तिकथां निपीय नलयशो वर्णनमाकर्ण्यानया भैम्या चिराय विमना-
मानया हृष्टचित्तया दुर्मनायमानया तस्थे स्थितं॥ इदृग्गुणो राजा मया कथं लप्स्यत इति वि-
मनस्कता॥ अकारप्रश्लेषेण विमनायमानया ज्ञातं चिरकालमाकर्णयंत्येव स्थिरचि-
त्तया ऽवहितचित्तया जातमिति वा व्याख्येयं॥ तत्कीर्तिसुधामपीति पाठः॥ चिरायनीपीय

नै०स०

॥२७॥

वासं बंधः॥ अकथितं चेति द्विकर्मत्वात्सख्येर प्रधाने कर्मणि निष्ठा॥ नयाभिहितत्वात्तु द्वितीया प्र०टी०
चारणाइति॥ गुणानि तिन लोके लिषष्ठीनिषेधाद्वितीयात स्खेद्गति भावे क्तः॥ पक्षे निपी
यत स्खेदुस्सत्रमुखंव्यादायस्वपितीति वतुल्यकालाएव त्यप्॥ विमानाइया चेरतीति कर्तुः
क्यङ् सलोपश्च॥ अस्मसार्वधातुकेति दीर्घः॥ डित्वाण्णत्व चू॥३७॥ पूर्वश्लोकपंचके नैस्याः
नलस्य वर्णानुरागं प्रतिपाद्येदानिं लिपिस्वप्नादौ दर्शनानुरागं प्रतिपादयति॥ प्रियमि
ति॥ सा भैमी तिस्वाज्ञया कारुवरेण कुड्ये न लिपिकर्त्तप्रियोस्थ नलेखितं॥ नलस्य
स्वस्यास्सन नस्वसख्यं रूपसाम्यमीक्षते स्म पश्यति स्म॥ इति किं॥ हे कारुवर त्वं अधित्ता
त्वाग्रहभित्तिभित्तौ त्वामहं क्रीडागृहं तस्य भित्तौ॥ विनत्कार्यवेद्य यीभावः॥ प्रियं नायकं प्रियां नायकां
च उभौ काव्यनिर्दिष्ट नामानो लिख॥ किं तु तौ त्रिजगज्जयी भैमी त्रयाणां जगतां सासार स्त्रि
जगत् त जयतीति एवं शीला भैमीः सो भाग्ययोः॥ जगत्त्रयमामा वामेव सुंदरा वितिर्॥ जयी सत्र
जिद्दक्षीति नो पुंवद्भावः॥३८॥ मनोरथेनेति॥ स्वपती निद्राणा सा भैमी मनोरथेन वांछया
स्वपतीकृतं अस्वपतिः स्वपतिः कृतः स्वप्राणेश्वरीकृतं नलं क्षनित्रि कस्यां रात्रौ न पश्य

॥२७॥

तिस्मापि तु सर्वस्यामपि॥ दिवा दृष्टस्य स्वप्ने दर्शनात् कदाप्यदृष्टस्य कथं दर्शनमित्यर्थे हेतुमाह॥ अदृष्ट
मिति॥ स्फुतिः स्वप्नः कदाचित् अदृष्टमप्यर्थं वस्तु धर्माधर्मसामर्थ्याज्जनदर्शनातिथिं जनदर्शन
गोचरं करोति॥ यद्दृष्टं पश्यते स्वप्ने नानुभूतं कदापि नेति न्यायेन जन्मान्तरस्थानां तराननुभूतं समु
सन्नसंस्कारमस्मिन् जन्मन्यदृष्टमपि अर्थं धर्माधर्माबेदर्श्यत इति भावः॥ चित्रादौ नलदर्श
नेसत्यपि साक्षात् दर्शनाभावाद दृष्टश्रोत्रियुक्तः॥ साक्षाच्चित्रे तथा स्वप्ने तस्य स्यादर्शनं त्रिधेति॥
अत्र तु तृतीयं प्रकारद्वयं॥ ३७॥ निमीलितादिति॥ निद्रायैव स्फुष्टस्येव अस्याः भैम्याः समहीपतिर्नलः
महत्तु रहस्यं अदर्शि दर्शितः॥ किं भूतः कदापि जाग्रत्स्वप्नावस्थायाम्[illegible] पि एवं रूपत्वेनाविक्षितो यार
दृष्टः॥ किं भूत्वा निमिलितान्मुद्रितादक्षियुगान्नेत्रद्वयात् संगोप्यसम्यक् गोपयित्वा तथा बाह्येन्द्रिय
स्यचक्षुरिन्द्रियस्यैव मौनेन स्वपिषयग्रहणाभावेन मुद्रितात् द्रूपलक्षण[illegible] विषयग्रहणे ऽशक्ता
हृदोपि मनसोपि संगोप्याक्षियुग मनसोरपि ज्ञातुमदत्वेतियावत्॥ चशब्दापि शब्दावन्योन्यस
मुच्चये॥ महारहस्यत्वेन निरतिशयानन्दात्मरूपत्वेन निद्राया भैम्या साक्षात्र दर्शितदृत्यर्थः॥

नै॰स॰ ॥२२॥

प्र॰टी॰

ननु सुषुप्तौ मनसोप्यव्यापारत्वेन तर्हि ज्ञानं कथमुच्यते॥ स्वप्नार्थानां बाह्येंद्रियग्राह्यत्वाभावाद्बा
ह्यत्वाभावो सुखादिष्वंतर्गतो वा ‥ भावादान्यान्तरत्वाभावेप्यदृष्टसहकृतं केवलाविद्यावृत्ति
रूपसुषुप्तिविषयत्वस्य युक्तत्वात्॥ आत्मन एव तत्र द्रष्टृत्वाच्चात्मरूपेण नित्यस्फुरणोप
पत्तेः॥ यद्वा नलमेव नैम्यान्नुरक्तत्वान् ‥ पि विनाविषयमात्रस्यापि विरागसंभवात्सकृत्वात्संभवाद्ध्या
नानंतरं च सर्वमतमस्याप्तं न किंचिद्देवेदिषमीत्यनुसंधानस्य सद्भावान्नलविषयत्वेमंतरेणैवमनु
संधानस्यायुक्तत्वात्॥ सुषुप्त्यवस्थावन्नासनलमेव मम मनिरतिश्रयानंदात्मरूपत्वेन स्फुरितं इ
ति बोध्यानंतरं तया ज्ञातं इति भावः॥ इतिपथाकथंचित्सुषुप्त्यवस्था व्याख्येया॥ एवं यथाक्रमं श्लो
कत्रयेणावस्थात्रयेपि नलस्य साक्षात्कारो वर्णितः॥ बालत्वादतिगूढत्वान्नलविषयस्तदीयोनु
रागः केनापि ज्ञातं इति तस्य महारहस्यत्वं॥ व्याख्यानांतरं च॥ एवंस्मिन्नश्लोके स्वप्नस्वा ‥
मनोरथेतिश्लोके मनोरथेन नलः पतिनत्वे वस्वप्नावस्थायां दृष्टं नलं प्रति स्वयमेव आ त॥ नि

नत्रा ख न

॥२२॥

43

मीलितादिति॥ हे नल सः प्रसिद्धस्त्वं पतिः स्याः नवेति प्रार्थनायां लिङ्॥ आर्यान्मम प्रसिद्धनलस्य पुण्
राणादौ नैमी पतिः नल एव न तिं द्वाद यइतिइं द्वादि परित्यागेन तस्यैव प्रार्थनायां संबोधने हे
तु माहयतः हे अक्षियुगात् अक्षौ विभीतको निवासो स्यास्तीति अक्षि अक्षि च तद्युगं च कलि
युगं तस्मादपि बाह्यभिन्न॥ चोप्यर्थः॥ किंभूतात् दक्षियोगात् निद्र्यानिद्र जन्ये नाज्ञाने नैमीलि गी४
तान्तिरोहितान्त्या प्तादित्यर्थः॥ तथा हृदः आज्ञानिनोजडात् मूर्खादित्यर्थः॥ तस्मादपि बाह्य
भिन्न॥ किंभूतात् हृदः॥ इंद्रियस्य वाग्रूपस्य मौनं व्यापाराभावः तदेव मुद्रितं मुद्रा स्वभावो
यस्य परस्त्तोमुकादित्यर्थः॥ तत्क्षणे मा■ सरजांच्च द्दनाः स्वदुर्नमेपर दोषक्षण दिव्य ध
चक्षुषः॥ स्वगुणे च्च गिरो मुनिव्रता■ परवर्णग्रहेण प्रसाध्य वइति॥ तथा हे रहस्य मरहस्यासं
तं गोप्या मालक्ष्मीर्यस्य॥ तथा महनूमानाईएतेषु संबोधनेषु पदत्रयं हेतुर्यथार्थयोज्यं॥
किंभूतस्त्वं अदर्शि सिंगः अविष्णुपत्नी तिर एवं त्रिलाअदर्शिनो विष्णुजन्कोः तैः सह संगो मै
त्री यस्य पुनः किंभूतः॥ अकदाप्यवीक्षितः॥ नकं अकं दुःखं दापयन्ती सेवं नीला अकदापि न

स्वयं दुःखं ददाति दापयंति स्येवं नीला दुष्टास्ते रकदापि भिर वीक्षितो न दृष्टस्तत्संगरहित इत्यर्थः॥ अत
एव महीसर्वदोसव वान्॥ स्यादिति मध्यमपुरुषसामर्थ्यात्सा नैमीति ज्ञातव्यं॥ यद्वा कश्चन क
स्मैचिदाशिषं ददत्प्रार्थयते॥ स त्वं महीपतिः राजास्याः नवेति प्रार्थनायां लिङ्॥ यद्वा राजा
नं प्रार्थयते महीपतिस्त्वं समप्रसिद्धः स्याः॥ अन्यत्सर्वं वत्तु॥ दमयंती पदानि नलसंबोधनप
निसमानानीति ज्ञातव्यानीत्यलं॥ ८०॥ अहो इति॥ अहोभिर्दिवसैः एकत्रैर्भिः हिमागमोऽपि
हेमंतर्तावपि स्मरार्द्दितां मदनपीडितां नैमीं प्रति लक्षितरूस्य महिमादैर्घ्यं प्रपेदे प्राप्तं॥ विभा
शीभिरात्रिभिः नपर्तुपत्तावपि निदाघर्तुभिरेपि मेदसां नरामज्ञा बाहुल्यं लक्षणया स्थूलत्वं
बिभ्रत्तरां न विरहघटनं॥ हेमंततौ दिनानि रुस्वानि रात्रयो महत्यः॥ ग्रीष्मे दिनानि महांति रा
त्रयोऽल्पाः विरहित्वाद्दंतिवाहितुमशक्यत्वात्तां प्रति विपरीता जाता इति अहो चित्रमित्यर्थः॥ श्री
अहो इत्याश्चर्ये॥ विभ्रतां नीशोभ्यां स्तुवन्नेति सन्नेणोत्पलावनीं॥ ८१॥ इदानीं

नलस्यापि तस्यामनुरागमाह॥ स्वकांतीति॥ कदाचित्कस्मिंश्चित्समयेन लोपि लोकाल्लोकमुखाद स्या नैम्या गुणोत्करं सौंदर्यादिगुणसमुहं अश्रृणोनु किंनूतं गुणोत्करं युवचेयलोपितं॥ तरुण चेयलो पन शीलं॥ तथास्वेति॥ स्वस्या नैम्याः कांति कीर्त्तिञ्ज ज्ञाः सौदर्य विषयो योयशः समूहः स एव स्फच्च वान्मौक्तिकस्त्रक् मौक्तिकमाला तस्याः अंतर्घनानलमनसि घटना संबंधस्तस्मै गुणश्रियं दार कश्रोत्रं प्रियंतं कुर्वाणं गुणोत्करेण नलचेतसि तत्कांति कीर्तिगुंफिते स्पर्थः॥ मालायां अंतर्प टनार्थदोरकोत्र वति॥ यद्वा स्वस्य घोनलस्यतत्योगेन नलरामणीय कानुरूपो नैमी गुणसमु होद्भूति भावः॥ मौक्तिकमित्ति विनायादित्यात्स्वार्थेटकू॥ लोकादिति हेतौ पंचमी॥ ४२॥ तमिति॥ ततो नैमीगुणश्रवणानंतरं स्मरः कामः तमेवावसरं प्रस्तावं लब्ध्वा तया नैम्याकृत्वा नैषधं नं लं विजेतुं परि न वितुमिये षुरैच्छतु॥ तत्रेक्षते॥ मूर्त्तया शरीरिण्यानिजयास्वकीययाक्षमोघ शन्वेवयः स्यशरीरस्यया श्रीनातस्याः जयः तेनजातो मत्सरः क्रोधो यस्येति पराजये च्छायाः कारणं॥ जातक्रोधो वैरी कमपि अवसरं प्राप्य शत्रुत्वायुधः सन् वैरिणं पराजेतुमक्रमते॥ त्रै

नेति भिदादिगणेनिपातनात्साधुः ॥४७॥ अकारीति ॥ नेन क्षमाभुजा राज्ञा नलेन भीमनृपात्मजा
लयो भीमनृपकन्यायाः आलयो स्थानमाश्रयो यस्य स एवं भूतो गुणः सौंदर्यादिश्रवणाति
थिः श्रवणगोचरः अकारि कृतः आकर्णित इत्यर्थः ॥ आदरातिशयो द्योतनार्थं अतिथि
पद ॥ स्मरेणापि गुणः प्रत्यंचास्यास्त शरासनाश्रयः ॥ अस्त्रमनः यतः शरासनं धनुस्तदाश्र
यश्चा धारस्थानं यस्य स एवं भूतो कारि ॥ किं भूतेन तस्य नलस्योद्धं उत्सूयुत चेर्यं तस्य व्ययो नाशः
तस्मै संति तोऽधनुष्यारोपित इषुर्येन ॥ यदैव नैमी गुणश्रवणं जानं तदैव तस्यै कामपीडा जा
तेति भावः ॥ चकारस्त्वतुल्यकालद्योतनार्थो वा गुणेन नंहढयत आत्मशरासनमिति वा ॥४८॥ अ
मुष्यैति ॥ स्मरत्रयाणां लोकानां समाहार त्रिलोकी तस्याः विजये नार्जितानि संपादितानि अ
पियशांसि कीर्त्तिः संशयेसंदेहे निमज्जयामास ॥ खलु संभावनायां ॥ त्रैलोक्यजितेऽपि यद्येनं जेतुं
न क्ष्यामि तर्हि एकस्याजयेन सर्वापि कीर्त्तिर्गमिष्यतीति शक्ष्यामि न वेति संदेहः ॥ किं भूतः स्मरः
तदा धीरस्य अमुष्य नलस्य जयाय त्रिरवे बाणै ज्यासनाथ्यं नसनाथां कुर्वन् योजयन्नित्य

र्थः॥ यतः सहसहिताहितान नपेक्ष्य यत्कर्म तत्साहसं तद्वानत्र अविमृश्यकारीत्यर्थः॥ विज्ञैर्वैरिति अति
धीरस्येकेन जेतुमशक्यत्वाद्बहुत्वेन लोकापेक्षाया। तेन तस्य धीरत्वमुक्तं॥ विजयार्जितानीति
पाठः साधीयान्॥ यायेतितुमर्थादिति चतुर्थी॥ निमज्जयामासेति मज्जेः सकारस्य नलोजनगुडु
न्नितीयो दकारस्तस्य च जतीनामिति निर्देशाद्बुत्वं॥ ८९॥ अनेनेति॥ अस्य नलस्य तत्प्रसिद्धता
दृक् दुर्नेघमपि धैर्यमेव कंचुकं पाष्ट्येः पुष्परूपैरप्यनंगमार्गणैः कामबाणैर्धैर्यघस्माद्भे
द्विदारितं तत्तस्मात्तथा वक्ष्यमाणनैम्यभिलाषींद्रादिपरीक्षाजनप्रकारेणानेन नलेन नैमी
बदयिष्यतः संगमयिष्यतो विधेर्ब्रह्मणः अवंधेछया। अवंध्या सफला इच्छा मनोरथो यस्य भावस्त
त्ता सफलेच्छया व्यलासि विलसितमिति कविवितर्कः॥ तत्ताहक् दुरनंगमार्गणैर्दारणस्येक
वापदं॥ तैः पंचसंख्यया प्रसिद्धैरल्पैस्ताहग्भिर्भ्याभिर्मृदुभ्लक्ष्णैः काममार्गणैरिति॥ अंगरहि
तस्यापि पुष्परूपे बाणे धैर्यकंचुकरूपस्यापि वस्तुनो यद्विदारणं तत्र सफलेच्छया एवं वि
लासि इत्यनियन्तदोःक्रिया विशेषणत्वं वा॥ असंभावितमपि विधिरस्रष्टं न वत्येवेति भावः॥ व्यलासि

ब्र. स्था. २

म

ति मा वेत्थि च॥ अनदिति कर्मवर्त्तरि कर्मणि वा चिण्॥ पोष्येः जे दविवक्षायां संबंधे ऽणु॥ स्वार्थे
वा॥ ८६॥ धैर्यं लिंगमेवाह॥ किमन्यदिति॥ यस्य कामशास्त्रैर्बाणैस्तापितामहोऽब्रह्मास्त्रघापि रिनो
जं कमलमाश्रयति॥ अहो आश्चर्यं॥ वृद्धोपि कौसंतमः॥ यः स्वपितामहस्य प्पतिवृद्धमपि तिए
ऽपि चशास्त्रैः पीडयतीति सोऽन्यं पीडयतीति किं वाच्यं॥ स्वजावसिद्धं कमलासनत्वं कामे
संततसत्वेनाप्नोक्षितं॥ लुप्तोऽत्र क्षा॥ संतप्ताः शीलमाश्रयंतो॥ अनन्यवारिजं पदं॥ अत्र स्वका
मस्य वर्णनीयं तत्राहं शाक॥ नरतः आत्मनः स्वस्यानुछायतया शरीरसाम्येनैव॥ यद्वा तन्वी
छायां शोभायस्यानस्य शाबस्तया विरहव्यथा जनित शोभा तया नेस्मरं लघयितुं जेतुं न शक्त॥ य
द्वास्मनः स कामशास्त्र कामस्य तनु छाय न या तमशोन त्वेन जेतुं ना शाक दपितु शास्त्र के वा॥ नस्यास कां
तित्वमपि स्तनोऽधिककांतित्वमेव जयइ स्वार्थः॥ पूर्वं तस्यातिशायितं चेत्यं वर्णइत्यातन्नाशोक
यने विप्रलंभकथनार्थं॥ शंष्वितु मितिशाकियोगेनुमन॥ ८७॥ उरइति॥ सा तन्वी कृशांगी स्व
स्य त्रय्यैव सरिन्न दीन स्यादुर्गप्राकारमपि त्रयासरिदेव दुर्ग वाप्रतीयंती त्वानलस्यहृदयं यत

विवेनाप्रविष्टा ॥ यद्वा नलस्यैव त्रपासरिद्दुर्गं तदुरोनु वा नक्षस्थजैलैन कुंनयुगेन कुचकलशयु
गेन जर्जरितं ॥ तं विलिप्सितं किमुत्प्रेक्षायां ॥ किं नु तेन नवोपहारेण नवोन्नतनं उपसमीपगता
हारो मुक्ताहारो यस्य नवोपहार उपायनरूपेण वा ॥ वयसा यौवनेन नवं तं वयस्थं तं तेन ॥
तेन नलज्ञेनास्य कासं पन्नयौवना नैमी ध्याते स्यार्थः ॥ अन्यापि किं नु कारकूतं उपढौकितं
कुंनद्वयवक्षःसि निचाय जलदुर्गं तीर्त्वा प्रियसंकेतं गच्छति ॥ यच्छ्रोप्यर्थः ॥ सा तन्वी पितु
रोमुवा कुंनयुगेन त्रपासरिद्दुर्गमपि प्रतीर्य तं नलस्य हृदयमपि विवेशाद्रिमिति वितर्कइ
तिवान्वयः ॥ किं नु तं दुर्गं जर्जरितं नमत्युच्चमित्यर्थः ॥ अन्यन्नु पूर्ववत् ॥ उपायनमुपप्राप्तमुपहारस्त
थापदेत्यमरः ॥ उरोभुवेति नापीनपुंस्कचेन नुमाभावः ॥ कुंनयुगेनेति कर्तरि तृतीया ॥ ४७ ॥
अपि ति ॥ मनोनुवाका मे नलस्य नलस्य यदि निर्वाच्यं रूतं न तनु निशारात्रिः शय्याप्यात्रस्त्रर
णं चाबोधि जानाति स्म ॥ किं नु तस्यास्यजनायत्लो कायनिजोस्वस्वक्रियामधिरतामचैर्यमप
नुवानस्यगोपायनं ॥ किं नु ता रात्रिः शय्याचयनो जागरदुःखं साक्षादिक्षमे विदुषी स्यार्थः ॥ न

नै॰स॰

॥२६॥

प्र॰टी॰

ज्जागरे स्येकं पदं वा॥ शशांक कोमलाः चंद्रेण मनोहरा शशाः स्य मृग विशेषस्य अंकः उत्संगः तद्वन्म
हीचंद्रवन्मनोहरा वा॥ चंद्रेण कर्पूर प्रक्षेपेण मनोहरा वा॥ चांद्री रात्रिरतिः दुःसहत्वात् जगद्दुःख
साक्षिणी॥ शय्या चास्मिन्विलुठनैव॥ रात्रिशय्या व्यतिरेकेण केनचित्तद्वीरह दुःखं न ज्ञातमि
तिनाव॥ जनायेति श्लाघह्नुङ् इति संप्रदानत्वं॥ अबोधि तिदीप जनेति कर्तरि चिण्॥ निशेति
हलंता ह्वाटाप्॥ शय्येति संज्ञायां समज्जनीति क्यप् डि स्ययड॥४९॥ स्मरेति॥ स्मरोपितप्तो
पि मृत्नां अतिशायेन कामपीडितोपि नलः विदर्भराजं बिदर्भदेशाधिपं भीमं तन्नयां कन्यां
नायाचत॥ यतः प्रभुः समर्थः अभिमानी तियावत्॥ कामपीडितः कथं न याचितवानित्यत
आह॥ मानिनोभिमानिनः पुरुषाः शर्मस्फुरवतः संजस्य प्राणानपि त्यजंति एतद्वयं येषां
वरमल्पमिष्टं॥ एकमह्नीतीयंप्रधानं अयाचितव्रतं अयाचनरूपं पाठक्रमात् आर्थक्रमस्य
बलियस्त्वात्शर्मपदस्य पूर्वमन्वयः॥ एवह्याचकारस्तुल्यघेतिमार्थः॥ शर्मयथा नवति न था
सनपि स्त्वधुजंति स्फुरवेनत्यजंतिसूर्थः॥ वरंक्लो भूमिति विलोपणं वा॥ विदर्भराजेति॥ राज्ञाहः
सखिभ्यष्टच्॥ मा किंचिद्धिकर्मकः॥ देवाहृतेवरः श्रेष्ठत्रिषु क्लीबं मनाकूप्रियइत्यमरः॥५०॥

पिस

॥२६॥

मृषेति ॥ अयं नलः क्वचित् कस्मिंश्चित् दुःस्थे विषये मृषा विषादानि नयात् न दुःस्थगतमिति मि
थ्याखेदप्रकटनात् वियोगजां विरहजनितां निश्वासततिं निश्वासपरंपरां जुगोप तिरोधत्ते
स्म ॥ तथा विलेपनस्य चंदनस्याधिकभाजां पांडुतां चापललाप ॥ अद्य चंदनस्य मध्ये कर्पूरो ऽ
धिको जातः तेनांगे पांडुत्वं न त्वन्यत्कारणमिति ॥ विषमत्वीति विषादः खिन्नः तस्याभिन
यात् निश्वासानुपदं शिवशिवेति नाम्नोच्चारणात् राजा गोपयत्यनुसारः श्रीचंद्रसंज्ञकर्पूर इत्य
मरः ॥ ५१ ॥ शार्ङ्गकेति ॥ अयं नलः अलीकवीक्षितो मोहेन मौग्ध्येन वीक्षिता प्रियां भैमीं
प्रतिय त्वं किंचिद्वभाषे ल दमयंत्यै दैवेन निन्होतुं गोपयितुं शार्ङ्गक ॥ वैणिके वीणावाद
नकुशले पंचमरागस्य मूर्च्छनासु आलपितासु पुनः पुनः गीतासु सतीषु समाजेव
सभायामेव मुमूर्च्छित [illegible] दपि अयेन रागमूर्च्छनाजनितसुखानुभवपारवश्यव्याजेन
निन्होतुं शार्ङ्गकः ॥ मूर्च्छाप्यपलपितेत्यर्थः ॥ सप्तानां स्वराणामारोहावरोहाः मूर्च्छाः ।
तास्त्वेकविंशतिः ॥ अथ च प्रियां प्रति अयं येभैमि इति व्याजेन संभाषितं तु निन्होतुं न शशा
केति काकुः । शार्ङ्गकेव ॥ शब्दान्तर्गत बाहुबन्धनमप्यपलपितं ॥ यद्यावैणिकैः पं

नै॰ अ

॥२८॥

चमरागमूर्छ्नासक्तानां प्रारब्धासक्तसतीषु समाजएव सन्नेव मुमूर्छ । अनेन नलरूतं नैमीसंबोधनं आ
कर्णनीयं समासे एव मूर्छां प्राप ॥ यद्वा किंचिद्भाषितं तु अय कामायनिन्होतुं न शशाक ॥ समाजा
यतु अपलपितुं समर्थो न तु ॥ यतः समाजए व मुमूर्छ ॥ कामाय इः कामः अयेत सो अये काम विषा
देच संलग्ने स्मरणेपि चेति विश्वः ॥ इः कामे पुरुषोक्तौ चेति ॥ अयः शुभावहो विधिः ॥ गीर्णा वादा
स्तके वेलिका इत्यमरः ॥ रागप्रकटीकरणमालपितं ॥ पशुव्यतिरिक्त समस्तवाचित्वात्समाज
स्यात्र घञ् ॥ वेलिकेरित्यत्रालिस्यमिति ठक् ॥ मूर्छोन्मादोचुक्तौ ॥ ५० ॥ अवापितः सद्भिः पतिः साप
त्रपत्तामवाप ॥ अन्यतोल्लङ्घ्नात् अपत्रपा तया सह वर्त्तमानः सापत्रपः तस्य भावस्तत्तां प्राप ॥
किंभूतः ॥ यतो जितेंद्रियाणां मध्ये अग्रे प्रथमतः कीर्त्तिता स्थितिर्मर्यादा यस्य ॥ विरहव्यथा लोके
भापि ज्ञातेति सलज्जो भूत इत्यर्थः ॥ कस्मिन्सति ॥ तत्र समाजे सतां मध्ये वसरे रोद्धुमशक्ये गो
प्यत्वं बरवैरी कामः तस्य विक्रमे क्रमेण परिपाट्या स्फुटतां प्राकट्यमुपेयुषि सति ॥ संवर
इति ग्रहत्वंद निश्वास पू ॥ ५१ ॥ अलमिति ॥ अमी विवेकप्रमुखा विवेकादयः गुणाः नलं इदंपू
र्वोक्तं चापलं रोद्धुमावरितुं अलं समर्था नाभवन् ॥ नलस्य चापलं निवारितुं न शक्ताः इत्यर्थः ॥ कि

प्र॰टी॰

॥२८॥

२ सर्वोपि प

लनिश्चयेन॥ यतस्ततः संप्रसिद्धः स्मरः रस्यामनुरागे सति पुरुषमनिरुद्धमेव चापलमेव स्वजनितं
करोति॥ अयमेतादृक्सर्गनिसर्गः सृष्टिनिर्मितिः स्वभावो वायमेव निश्चितय इत्यर्थः॥ अनुरागे स
तिं चंचलो भवतीत्यर्थः॥ विवेकस्य किमपि न चलतीत्यर्थः॥ यद्वा रसांसंजोगे अनिरुद्धो निवारितुमशक्यं चा
पलमित्यर्थः॥ अमी दृष्टाः कामेन सह्यमानस्य प्रसक्तं तस्याश्चापलस्य स्वभावः। अथ च मदनः प्रद्युम्ना
ख्यो रसां प्रियायामनिरुद्धनामानमेव पुत्रो जनयतीयत् अयमीदृशोऽनादिः स्वर्गस्वभावः॥ हेयोपादेयवि
चारो विवेकः॥ नरत्वनिति षष्ठ्यर्थोऽसप्तम्यर्थो वा द्वितीया॥ रुद्धेद्धि कर्मकत्वा स्वभावश्च निसर्गश्चेत्यमरः॥
रोद्धुमिति अलंयोगे पर्याप्तं वचनेष्विति तुमुन्॥ ५४॥ अनंगेति॥ स नलः यदा पस्मिन्समये विरुद्धचिन्ता
पलापविषये यन्नलवामपि सनसंसदि सभायां मनंगचिन्हं पांडुत्वकृशत्वगोत्रस्खलनादिकामचिन्हं
विनाक्षणमपि असितुं नो शशाक न समर्थो भूत्॥ तदा तस्मिन्समये आरामविहारकेतवात्॥ उपव
नेविहारः क्रीडा तस्याः कैतवात् व्याजेन देशं निर्जनं देशमुद्यानदेशं निषेवितुमियेष एष्टवान्॥ क्षणमु
त्सवरूपं निर्जनत्वात् उद्देशविशेषणं वा॥ यत्तदितिकारणार्थं वा॥ क्षणमुत्सव उद्धवः इत्यमरः॥ चिन्त
मिति पृथग्विनेत्यादिना द्वितीया॥ क्षणमिति पक्षे कालाध्वनोरिति द्वितीया॥ ५५॥ अथेति॥ अयानं

नै॰स

॥२८॥

सनलः यानाय यानमश्वमानेतुं निदेशकारिणो जनान्दिदेश आज्ञापयामास॥ किंभूतः विरहव्यथाव्यथितो
पि प्रियाकांक्षासमुत्पन्नात्स्मितेन तिरस्कृतः मच्छलोच्छन्नो कामः येन विरहव्यथागोपनार्थं अंगीकृतमौ
नत्याद्धा जितकामः॥ तथा स्वरहस्यवेदिभिः स्वाभिप्रायज्ञैर्द्वित्रैर्वयस्यैः सखिभिः सह पुरोपकंठोपवनं न
गरनिकटमुद्यानं किलेत्यलीकं इक्षताइक्षमाणः कामचिन्हापह्नवेन स्वयं नतु वनविलोकन इति किले
त्यर्थः॥ उपकंठे समीपेऽव्ययीभावः॥ पूरणगुणेत्यव्ययेन सह समासनिषेधात् पुरमुपकंठयस्येति
बहुव्रीहिः॥ वनं त्तनायो षष्ठ्यन्नावः॥ यानायेति क्रियार्थोपपदस्येति चतुर्थी॥ पदं॥ अमीतिः॥ तनस्तदा
ज्ञानंतरं अमीत्र सास्तस्य नलस्याश्वमुपारन्नानिन्युः॥ अश्वविशेषणानि॥ सितं श्वेतं॥ विनषितं विशेष
णालंकृतं॥ जवेपि वेगे पि पौरुषं चिकं पौरुषेण वल्लेनाधिकं मानेपि परिमाणेपि पौरुषं पुरुषप्रमा
णं मेत तस्मात् धिकं॥ अजस्रं चंचलैः अश्रयैत चंचलैः खुराग्रैः प्रयोज्यैः क्षोभितं चूर्णिकारितं मंदुरा
याः॥ वाजिशालायाः उदरं मध्यं येन॥ खुरैः खनन्यः पृथिवीमयमश्वोतरः स्मृतः इति शालिहोत्रे॥
विनषितं॥ वीणं पक्षीणं भ्रुविस्थानेषु षितं॥ वेगवशाद् आकर्णवत्राह्ह्य गगनागामिनमितिवासितमिस्य
नेन कफप्रकृतित्वं॥ अनेनातिबलत्व सहिष्णुत्वादि लक्षणं सूचितं॥ उर्ध्वं विस्तृतदोः पाणिनमा

प्र॰टी

॥२८॥

55

नेपो हर्षं त्रिषु इत्यमरः ॥ वाजिशालातु मंदुरा इति च ॥ पुरुषत्राव्वा सपेक्षा नावेयु वादित्वा दण् ॥ परि
माणे तु पुरुषहस्तिभ्यामण् ॥ चेत्यण् ॥ क्षोभितमिति हेतुमण्णषतान्निष्ठा कर्त्तरि त्ततीया ॥ क
रणे वा ॥ ५८ ॥ अथेति ॥ अथानंतरं स नलो हयमारुरोहेति संबंधः श्लोकेनान्वयः ॥ अश्वविशेषणा
नि ॥ किंभूतं ॥ हयं ॥ स्कंधप्ररूढाः केशाः केशरकेशाः तेषां रश्मिभिस्तल्लक्ष्यतेरेव किरणैर्वा विराजि
तं ॥ किंभूतैः निगालगात्तगलप्रदेशे वर्तमानैर्लक्षणैर्भूतौ देवमणेर्देवमणिनाम्नो दक्षिणाव
ना५ र्तोत्थ अवटुगामिना अंतरेण कंठमध्यवर्तिना अध्वना मार्गेणोत्थितैः निस्सृतैरिव ॥ तथा उज्ज्वलसा
न्निध्यैर्थीनीराज्ञिस्तस्याः नायमध्यंद्रस्तस्य महांसि किरणास्तेषां सहोदरैः सदृशैः प्रायेण सहोदर
त्वं ॥ केसरकेशारश्मिभिरुपलक्षितं ॥ विराजितं ॥ वीणांपक्षिणां राजा विराजो गरुडस्तद्वदाचरितं विरा
जितं ॥ निगालस्तु गलोद्देश इति ॥ अवटु घाटा कृकाटिके इत्यमरः ॥ देवमणिस्त्रिवेऽध्वस्यकं
ठावर्त्ती च कौस्तुभे इति विश्वः ॥ सहोदरेति वोपसर्गस्येति वैकल्पिके चासो देशाभावः ॥ ५९ ॥ अमस्येति ॥
रेणुभिश्चरणेषु उपास्यमानं सेव्यमानं किंभूतैः रेणुभिरश्वगमनेनिरंतरं भूमीतटकुट्टनेन भूमीतलचू
र्णनं तेनोत्थितैः कैरिव ॥ अणिमा अणुपरिमाणं संतेनो नांकि तैः जनस्य लोकस्य चेतोभिरिवांतकर

णेव॥ अणुपरिमाणं मन इति॥ किंन तैरप्युक्तोऽभि॥ रयप्रकर्षस्य वेगातिशयस्याप्युपनार्थं पठनार्थमाग
तैः॥ तैर्दूरगं प्रेक्षितालोकानां वेतोभिः वेगातिशयनाप्युपयर्थमागतैरिवेत्युत्प्रेक्षेति मनोऽसौ पिसका
रणादस्य वेगातिशयो घोष्यते॥ अथ च शिष्या गुरुचरणयोरुपासते॥ अजस्रमभ्रमीनटकुट्टनं नुत्तमाश्व
जाति॥ नभ्रमीति रुदिकारादिति ङीप्॥ अणिमा मंजिमुवन॥ ५४॥ चलेति॥ चलाचलोतिचंचलः प्रो
थः ओष्ठाग्रं नासापुटं वा तस्य चाचवस्ततातयामहीन्तेनलायस्वकीयवेगविषये दर्पान्नावानूवक्तुं
मभिप्रायं तं उरुकम्पि वोत्कुंठितमिव॥ तन्वि किमिति नोक्तवानित्याशंक्याह॥ किल प्रसिद्धो॥ अयं न
लोहयस्याशयमभिप्रायं स्वयमात्मनेव वेद जानाति किलातो गिरा वाचालं पर्याप्तं इति हेतोरि
व मौनमास्थितं॥ चलाचलप्रोथ चसम्भजाति॥ ज्ञातुरग्रे स्वयं स्वगुणं वक्तुमनुचितमित्यर्थः॥ च
लाचलेतिस्यिलीपति बदीद्विर्वचनमभ्याकृष्यां॥ सस्येतिद्विचमागागमभ्य॥ अस्यास कार्यमिनचिति
वक्तव्यदागमदीर्घसामर्थ्याद्रूहलादिशेषोन॥ मही नतेक्रियया मनिप्रेतनि संप्रदानसंगिरे निवार
र्थयोगेतित्तीया॥ विदेतिविदोलटो वेनिलणलु॥ ६७॥ मन्हारथस्येति॥ मन्हारस्यायुतयोश्चिनःच
क्रवर्तिनः सार्वभौमस्य नलस्याश्वनिमार्गो॥ आकानागो मित्ये नास्ति अपेक्षापरेषां आत्मवानां

मितिअनपेक्षया॰नाश्रयेणाप्युद्वहनंतस्मा॰ज्जातंयद्यशस्तेनयन्नासासितंश्वेतं॥अतएवरदनानांदंता
नांअवदाताःनिर्मलाःये॰अंशवःकिरणाःतेषांमिषात्अनीदृशांपानानपेक्षोद्वहनसमर्थानांरवेःसूर्यस्याश्वानामश्वा
नांवलंअंतःमुखमध्येसहसतं॥सूर्याश्वाःपरापेक्षोद्वहनाः॰नाहंतथेत्युपहासस्तेषां॥ अहंपरानपेक्षोद्व
हनासूर्याश्वानांबलंदंतोज्ज्वलकिरणव्याजात्अंतःहसंतमित्यन्वयः॥स्वाभाविकंश्वेतत्वंयशोगुणेतुतुल्ये
नोत्प्रेक्षितं॥सूर्याश्वानांनीलवर्णत्वात्॥६९॥सितेनेति॥सिताश्वेतात्विट्दीप्तिर्यस्यतस्यचेचलतोचां
चल्यमुपेयुषःप्राप्तस्यपुच्छस्यकेसरस्यचस्कंधकेसरसमूहस्यमिषेणव्याजेनचल॰च्चंचलंचा
मरयुग्मंतस्यचिन्हैर्नैःघूननैःनिजवाजिराजतांवाजिनांराजावाजिराजस्तस्यभावस्ततानिजस्यास्य
नोवाजिराजतांअनिह्नुवानंप्रकटयंतं॥इतिस्फुटमुत्प्रेक्षा॥राजाहिश्वेतचामरद्वयेनवीज्यते॥
वाजिचलनप्रक्रियापक्षायाचिन्हैरितिबहुवचनं॥तत्करोतीण्यंतोत्॥नावेल्कृट्‌ ॥६२॥अपी
ति॥रयस्मयेवेगगर्वेप्रसन्नंबलात्कारेणजितस्यगरुत्मतोगरुडस्यद्विजिह्वाःसर्पास्तेषांमम
भ्यवाहारोनक्षणंतस्माघसोरुषंतस्मिन्नपिमुखेअनुषक्तालग्नाज्यतादीर्घाबल्गुःसं

नै॰स॰ प्र

॥३०॥

दंडीयावलाप्रहतयाऽरुणत्वात्प्रतिमल्लतां प्रतिपद्य तं सुपेपियासं प्राप्तं वेते॥ वल्गाग्रं नाहिसर्पपुच्छसदृक्षः
दृश्यते। पूर्ववेगदर्पविषये जितोऽपुनासर्पजेक्षणपौरुषेपि॥ वल्गा कान्यकुब्जभाषायां वागइति
प्रसिद्धा॥ ॥२०॥ सइति। सिंधुजं सिंधुदेशोद्भवं सितमहाश्वं द्रस्तस्य सहोदरं तुल्यं॥ उच्चैःश्रवस
दुंद्राश्वस्य श्रियेवर्णमोहरं तं नलस्स दृशां॥ किंभूतो नलः जितानल्पवियल्लाः क्ष्माभूतो राजानो येन
सनत्येम हतीलोचने यस्याये द्वानल्पं लोचनं ज्ञानं यस्या। क्षितौ पृथिव्यां पाकशासन इंद्र
इवा। यद्वा क्षितौ पाकं पचिक्रियां शास्ति उपदिशतीति सूयशास्तप्रणेतृत्वात्॥ उच्चैःश्रवा अपि
समुद्रजः सचंद्रभ्राता तं यथाति तसमस्तशैलः सहस्रलोचनः इंद्रः आरोहति। तथा तं आरोह
ति। सिंधुजमित्यनेन अश्वस्य लोके चतुः पंचशतात् उत्तमकुलमध्यमजत्वं बलित्वं महाका
यं च सूचितं॥ ॥२१॥ कुलकं॥ निजा इति। अश्ववारा अश्वसादिनस्तं मनुजेश्वरं राजानं न
लमन्वयुः अनुजग्मुः॥ किंभूता अश्ववाराः निजाः स्वकीयाः किंभूतं स्फुटं प्रकटं लक्षणं भूता
निरेखा[illegible] पाणियाम्परविंदानि तैरंकितं चिन्हितं पाणिपंकजं यस्य तं॥ तथा जवनो वेगवान् यो ऽश्वः
तेनयातीति एवं शीलं। केकमिव॥ निजाः सहजा मयूखाः किरणा स्तिक्षणदीधितिं सूर्यमिव॥ प्र

प्र॰टी॰॥

॥३०॥

कान्तरूपाः सूर्यविशेषणमपि स्फुरेति। कमलपाणिसूर्यईस्यागमः॥ सूर्योपि जवनैरश्वैर्यातीति॥ मयू
खाय यास दासूर्याचारिणा तथा अश्ववारा अपि। तेन तेषां स्वरहस्यवेदित्वमुक्तं। जवनस्कंजवाचि
कईसमरः॥ प्रकाशेति प्रसिद्धेस्यात्र कान्तातपयोः स्फुटइति शाश्वतः॥ मीनाति हीनस्ति तइति मयू
खः॥ मीनातरू खेइसोणादिकरूखप्रत्ययः॥ अश्वानूच्णवतइति अश्ववाराः॥ कर्मण्यण्॥ मुंचे
क्रम्यति युजि जगवनः॥ ६५॥ चलन्निति॥ नगरालयैः नगरमालयं येषां ते नगवासिभिः लोकेजनैः
नलः अलौकिक स्वेच्छाया दृष्टः॥ किंभूतः महारयं अतिशयित वेगं हयं अश्वं स्वाधिष्ठानेनालंकृत्य चल
न्सूर्य्येमार्गं गच्छन् पुनः किंभूतः स्वस्य वाहोऽश्वः तल्लक्षणा वाहः यालनं तस्योचितो वेषो अलंकारादिस्ते
न पेशलः रमणीयः यद्वा वाहवाहस्याश्ववारस्य॥ यद्वा वाहस्याश्वस्य वाहे संचारे उचितो वेषो नेपथ्यं॥
किंभूतैः जनैः प्रमोदेनातिनातिन्द्राया नंदेन निस्पंदताराणि निश्चलान्युपक्ष्माणि नेत्रपक्ष्माणि येषां॥
निर्निमेषं सादरावलोकनं कुर्वद्भिरित्यर्थः॥ महारयमित्यनेनाष्टभिर्मात्राभिर्धनुर्न्नातमात्रं भूलघ
नसामर्थ्यं सूचितं। वाहस्कमीन नेदे चरषेहयइति विश्वः॥ पेशलः सुंदरो दक्षइरनि॥ निस्पंदेति पाठः॥

नगासं यस्मिन्नगरं ॥ उषस्कसितयत्रनगर्यां क्रिसादिव वनाद्रः ॥६६॥ क्षणादिति ॥ अथानंतरमेषः नलः
वाजिनाऽश्वेन ताभिर्जनदृष्टिवृष्टिभिः सहैव क्षणेन निमेषमात्रेण पुरेण नगराद्बहिरानूनुः ॥ किंभूतं क्ष
णदाराविः तस्या पतिश्चंद्र तद्वत्तना यस्य ॥ तथा पुरुहूत इंद्र तद्वत्सोरू षं सामर्थ्यं यस्य ॥ किंभूतेन वा
जिना ॥ प्रजंजनेन वायुनाऽप्यजेयोऽप्यजेतव्योजवो वेगो यस्मात् ॥ क्षणादिति विभक्तिप्रतिरूपकमं
व्ययमेतत् अपपरिवहिरिति पंचमीसमास्य विचनादेव ज्ञापकत्वाद्बहिर्योगे पंचमी ॥६७॥ त
तइति ॥ पुरनिर्गमानंतरं नासीरं सेनासेनामुखं गते प्राप्ते नलस्य सादिबलेऽश्वारोहसैन्ये कुतू
हलात् अत एव मृषा अलीकं मृषा च युद्धविते न तु भ्यक्रुः किंभूते बले हे भार चमदीयं ...स्त्रप्रतीपस्थो
नेगृहाण ॥ प्रहरमयिप्रहारं कुर्वीति भाषिणी वदति ॥ तथा परस्परस्पारितउल्लसिताः उद्धीर्णाः न तु
क्षिप्ताः आल्यामानां ...स्त्राणां पल्लवाः प्रांताः यास्यां ॥ अत एव मृषा ॥ पल्लवः प्रांतवाची वस्त्रपल्लव
वत् ॥ नलस्य कुतूहलादिति वा ॥ आल्यं सतो मरंद्रा स्त्रं ॥ सेनामुखं नासीरमित्यमरः ॥ परस्परेस्यत्र कस्का
दित्वात्साधु ॥६८॥ प्रयातुमिति ॥ निजेन स्वीयेन वेगेन प्रयोजकेन दर्पितैर्गर्वं प्रापितैर्वाहैरश्वैरिति
वमनसि च वाहेनोर्वा रजः उद्गमुत्थापितं ॥ इति किं ॥ इयं पृथ्वी गच्छतां धावतामस्माकं अश्वानां पि

क्रियस्यदंस्यात्तन्नपितुद्वित्राणिपदानिनविष्यतीतियस्मादलरवप्रयातुंप्रकर्षेणयातुंगतुंअन्योपि
रपिसमुद्रोपिस्खालयितांस्खलमिवचरतुनवतु॥किंनतंरजः पयोधेः समुद्रस्यरोधोपूरणंतत्र
क्षमंसमर्थंप्रयातुमित्यस्यस्खलयतामित्यनेनसंबंधः॥दर्पितेरपिण्यंतान्निष्टा॥अन्यथान्नप
नुकिकरणदृष्टा॥इतिस्यात्॥णिच्किकरणस्यदृपितिइतिस्यात्॥द्दती॥हरेरिति॥इतिविचार्य
हेतोर्वानुम्नितानुनैर्नम्नितं॥आननंमुखंयेः॥अर्द्धेनएवार्द्धेननजस्यंतरि[illegible]क्षेरुतक्रमः पादवि
क्षेपायैस्तैरश्वैर्न्यवर्तिपराव्रत्तं॥अर्द्धेननसीतिवा॥इतिकिं॥यत्खंनुनः हरेर्विष्णोरेकेनासहा
येनपदाचरणेनाक्रामिआक्रांतं॥तस्यखस्यनभसः चतुर्भिरेवपदैश्चरणैः क्रमणआक्रम
णोस्माकंहरिणामश्वानामथचविष्णुर्नाबहुनामस्माकंत्रपालज्जानविष्यति॥इतिनः सजातीय
नरहरिणायेकेनपदाक्रांतंनभः तस्यबहुभिरस्माभिर्बहुभिः पदैराक्रमणेऽस्माकंमहतील्लज्जा
कथंनस्यादितिव्राब्दस्यच्छलेनुपोस्रेक्षा॥सलज्जश्चनम्नमुखोनवति॥अर्द्धेननः रुतमित्यनेन
गतेरुतमत्वंसूचितं॥तेनसादिनोअनंदोरिणांभीतिश्च॥नोदतोपत्रपमातस्यानावमेरितिनि
षेधादक्रामितिनिसंसरुद्द्माविर्द्धनवतिद्विर्वर्द्धसकृद्वर्द्धनवतीतितदोदावचनज्ञापिनयाप

नै. प्र.

॥३२॥

रिनाषियायत्क्विनिषेचस्यानिसत्वमस्यिसकथंचिस्परिहरणीयं॥यदानुनववाचेत्यत्रस्वरार्थमदेतिम
सपक्षस्तेदेतदोतस्याः परिनाषयानिर्मुलः त्वाच्चित्रिसमेवापह्वाप्रागिदन्ना इति धमेविन्नक्तिसान्नविन
क्तोविसनेनेवमकारस्यसंज्ञानिषेधेसिद्धेइदमः स्वमुरित्यकारोच्चारणंव्यर्थसदोतस्याः परिना
षयामुलमितिज्ञेयं॥गसंतरवागवेषलीयं यदेतिदन्निति पदादेन्ना।एकैकेनस्यकाचिदाषिन्निति
वेतिचकारात्कनू॥७०॥चमुइचराइति॥तस्यनृपस्य चमुचराः सेनाचराः सादिनोऽश्ववाराः तं
पूर्वोक्तंविहारदेशं बाह्यालीलाप्रदेशंअवाप्यप्राप्यतुरितुरंगमानपिबहूनश्वानपिमंडलीम
उल्लाकैर्णगतिविशेषमाकारयन्॥अपिशब्दात्मंडलीकरणावगात्स्वयमिरूढवंतः।केइवजि
नोक्तिषुबोद्धवचनेषुआह्नतयाअस्तिक्यतयासैधेवाइवसिंधुदेशोद्भवाजनाइवविहारास्थग
गतालयंप्राप्यमंडलीकारेणवतिष्टनेतधेस्यर्थः।तेषांमयसंप्रदायः।तंदलादिसमभान्यमथा
मंडलींकारयंतीनितसंप्रदायाविदः।चमुचराइतिचरेष्टः।आहइतिमत्वर्थेप्रज्ञेति।मंडलीमि
तिगोरादित्वान्ङीप्।तुरंगमानुन्नकोरितिकर्मत्वं॥७१॥द्विषद्धिरिति॥तुरंगमैरश्वैरितीवहेतोरि
तिविचार्यवाचारामास्कंदिनादिपंचप्रकारांगतिंअवधीर्यस्यैत्काश्नवज्ञायमंडलीक्रियाश्रीय।

प्र. टी.

॥३२॥

तिष्ठापरिणयदहनाधानचौलोपवीतक्षौणीपालाभिषेकोदवसितविशनं नैव याम्यायने स्यात्॥ नोवावाल्यास्तवार्द्धे
सुरगुरुसितयोर्नैव केतूदये स्यान्मकृंवार्द्धे च केचिन्नहितितमपरे यावद्दाक्रांतदुग्रे॥२६॥ गीर्वाणा देवाः अंबु जलं लक्ष
णया जलाशयः तयोः प्रतिष्ठा गीर्वाणप्रतिष्ठा जलाशयप्रतिष्ठा चेत्यर्थः॥ परिणयो विवाहः। दहनाधानमग्न्याधानं।
चौलं प्रसिद्धं। उपवीतं व्रतबंधः। क्षौणीपालाभिषेको राज्याभिषेकः। उदवसितविशनं गृहप्रवेशः। गृहं गेहोदवसित
मित्यभिधानात्। अत्र समाहारद्वंद्वः एतानि कर्माणि उपलक्षणत्वादन्यान्यपि नियतकालानि शुभकर्माणि याम्या
यने दक्षिणायने नैव स्युः। स्यादित्येकवचनं मूले समाहारद्वंद्वं कृत्वाभिप्रायं॥ यदाह महेश्वरः। चूडाकर्म नृपाभिषेक
निलयाग्न्याधानपाणिग्रहान् देवस्थापनमौंजिबंधनविधी कुर्यान्न याम्यायने इति किंतूत्तरायणे कुर्यात्। तदुक्तं रत्नमाला
यां। गृहप्रवेशत्रिदशप्रतिष्ठाविवाहचौलव्रतबंधपूर्वी सौम्यायने कर्म शुभं विधेयं यद्गर्हितं तत्खलु दक्षिणे स्यात्।
विशनमिति ल्युट्प्रत्ययस्याकित्त्वाद्यभावात् सुगंतलघूपधस्य चेति गुणः प्राप्तः संज्ञापूर्वको विधिरनित्य इत्यनित्यत्वान्न भव

तीति। ज्ञापकं चात्र ओर्गुण इति सूत्रं। यथा। ओरोदिति वक्तव्ये गुणग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यात्तेन स्वा
यंभुवमिति सिद्धं। तथा च महेश्वरेणापि प्रयुक्तं। नृपाणां मृदुभैर्ध्रुवैः प्रविशनं यात्रानिवृत्तौ शुभमिति॥ अथवा यत्क्रमेणैवं प
ठितव्यं। गीर्वाणां बुप्रतिष्ठापरिणयदहनाधानगृहप्रवेशाश्चौलं राज्याभिषेको व्रतमपि शुभदं नैव याम्यायने स्यादिति।
॥ ॥ अथ सुरगुरुसितयोर्बृहस्पतिशुक्रयोर्बाल्यास्तवार्द्धबालत्वे अस्ते वार्द्धके च एतानि कर्माणि नैव कुर्यात। इदं प्रा
गुक्तमपि पुनर्लिखितं स्मरणाविच्छेदार्थः। मूलवाक्यान्यपि प्राग्वोक्तान्य---। वृद्धशब्दस्य गुणवाचित्वाद्गुणवचन
ब्राह्मणादिभ्यः कर्मणि चेति ष्यञ्। वार्द्धकमिति तु द्वंद्वमनोज्ञादिभ्यश्चेति मनोज्ञादेराकृतिगणत्वाद्वुञ्। अथ केतूदये शुभ
केतोरुदये शुभकर्माणि नैव भवंति। तदुक्तं चंडेश्वरेण। केतोरस्तदिनाहूर्ध्वं सप्ताहं मंगलं त्यजेत्। यावत्केतूदयस्ताव
द शुद्धः समयो हि स इति। अत्र केचित्केतूदये जाते सति पक्षं पंचदशदिनानि जहति वर्जयंति। उक्तं च वराहेण। दृष्टः षो
डशवासरान्नशुभदः कैश्चित्सदृष्टः शिखीति शिखी केतुः दृष्ट इति वचनाद्यावन्न दृष्टस्तावद्दोष इत्यर्थः। अत्रैवं ग्रंथकर्त्रा

एकदिनस्मागोऽकृरवाङ्कल्पभीतेः कृतः। केचित्तु वापकांतरे अर्द्धपक्षार्द्धसप्तदिनानि केतूदयादनंतरं जहति। तदप्यु
क्तं वराहेण।। केतूदये सप्तदिनानि वोर्द्ध्वं विवाहयात्रादिषु गर्हितानि। दिनानि शेषाणि शुभानि नूनं वदंति रैभ्यप्रमुखा
मुनींद्रा इति। ननु कैश्चित्केतूदयदर्शनं यावन्मंगलकृत्यानि निषिद्धानि अन्यैस्तु केतूदयानंतरं षोडशाहेवा दिना
नि निषिद्धानि तत्कथमनयोर्वाक्ययोरेकवाक्यतेत्यत आह तन्नमिति। अपरे आचार्या पीस्तं केतुं यावद्दृष्टं यावद्दर्शनं पञ्च
हति तत्र तु ये केतौ हि विचूर्णे तामसकीलका रावतिदुष्टफले दृष्टव्यं। तेन भिन्नविषयत्वाद्दोषाभावः तेषां केतूनां स्वरू
पं फलानि च गर्गोक्तानि। त्रिशिखा छविताराश्च रक्तलोहितरश्मयः। चापशल्लूनरामाशांसे वंते नित्यमेव ते। लो
हितांगात्मजा ज्ञेया ग्रहाः षष्टिः समासतः। नामतः कौंकुमा ज्ञेया राजा संग्रामकारकाः। कृष्णाभाः कृष्णपर्यंताः संकु
लाः कृष्णरश्मयः। राहुपुत्रास्त्रयस्त्रिंशत्कीलकाख्यातिदारुणाः इत्यादि।। वयंतु ब्रूमः। यावद्दर्शनं केतूदयो निषिद्ध इत्यु
क्तं तत्र तु ये त्वष्टपुत्राख्ये केतौ महादुष्टफले ज्ञेयं।। उक्तं च लोमशसंहितायां।। श्रावणे मास्य थपौषे मधुनि वा तिरवौ ब्रह्म

सं॰टी॰
३४

पुत्रोद्गमे वा दंपत्योरेव नाशः प्रचुरमुनिगणैः कीर्तितो वै विवाहे इति। मधुर्मेमीनः। ब्रह्मपुत्रः केतुः। विवाहस्योपल
क्षणत्वादन्यान्यपि शुभकर्माणि निषिद्धानि। केतोरस्तदिनादूर्ध्वं सप्तरात्राणि वर्जयेत्। ब्रह्मपुत्रोद्गमे वर्ज्यं व्रतं यात्रां च
मंगलमिति ज्योतिर्निबंधकृदुक्तेश्च। ब्रह्मपुत्रलक्षणं सफलं वसिष्ठेनोक्तं। त्रिशिखस्त्रिवर्णयुक्तो ब्रह्मसुतो ब्रह्म
दंडनिभः। अनियतदिक्प्रभवोसौ कांतकरो ब्रह्मदंडाख्यः। को ब्रह्मा तस्यापत्यं करोतीति तत्रान्येषां काकथेत्यर्थः।
अत एवोक्तं वराहेण। ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगांतकरः। अनियतदिक्संप्रभवो विज्ञेयो ब्रह्मदं
डाख्य इति॥ ॥अथ गुरुशुक्रयोर्बाल्यवार्द्धके च शुभं कर्म त्याज्यमित्युक्तं तत्रावसरप्राप्तं तदीयदिनसंख्यामनुष्टु
भाह। पुरः पश्चाद्भृगोर्बाल्यं त्रिदशाहं च वार्द्धकं। पक्षं पंचदिनं ते द्वे गुरोः पक्षमुदाहृते॥२७॥ भृगोः शुक्रस्य पुरः पूर्व
स्यां दिश्युदितस्य पश्चाद्यातत्रयथासंख्यं बाल्यं स्यात्। पूर्वस्यां त्रिदिनं पश्चाद्दशाहं बालत्वं शुक्रस्येत्यर्थः॥ च पुनर्भृ
गोर्वार्द्धकं वृद्धत्वं पूर्वस्यां पक्षं पंचदशदिनानि पश्चात्पंचदिनानि। गुरोस्ते द्वे बाल्यवार्द्धके पक्षमुदाहृते कथिते। यदा

राम
३४

हनारदः। पश्चात्स्वागुदितः शुक्रो दशत्रिदिवसं शिशुः। वृद्धः पंचदिनं पक्षं गुरुः पक्षं तु सर्वत्र इति॥ अथ परमतेन बा
ल्यवार्द्धकं चानुष्टुभाह॥ ते दशाहं द्वयोः प्रोक्ते केचित्सप्तदिनं परैः। अहं त्वात्ययिके त्र्यन्यैरर्द्धाहं च अहं विधोः॥ १८॥
दिङ्द्विपमंतस्माद्द्वयोर्गुरुशुक्रयोस्ते बाल्यवार्द्धके दशाहं दशदिनं प्रोक्ते केचित्। परैस्तु सप्तदिनं बाल्यवार्द्धके गुरुशुक्र
योः प्रोक्ते। तदाह महेश्वरः। बालः शुक्रो दिवसदशकं पंचकं चैव वृद्धः पश्चादङ्गात्रितयमुदितः पक्षमेव प्राक्क्रमेण। जी
वो वृद्धः शिशुरपि सदा पक्षमन्यैः शिशुत्वे वृद्धो प्रोक्तो दिवसदशकं चापरैः सप्तरात्रमिति। केशवार्कोपि। द्विपतिसप्तदि
नान्युदयास्तयोः सुरगुरुर्भृगुजस्तु गतेथ्ययोरिति। अन्यैरपि पुनस्त्र्यहं त्रिदिवसं बाल्यवार्द्धके प्रोक्ते। उक्तं च गार्ग्येण। शेषेतु
देशेत्रिदिनं वदंतीति॥ अथैषां बाल्यकानां गतिमाह आत्ययिके इति। अत्ययः कार्यविध्वंसभावः स प्रयोजनं यस्येति प्रयोज
नमिति ठक्। लग्नांतराभावे समयशुद्ध्यभावे वा अतीतकालस्य वटोरवश्यदेयायाः कन्यायागुणाणूबहरोपलब्धो वा यथासं
भवं दशसप्तत्रिदिनानां त्यागउचितो नान्यथेत्यर्थः। एवं तु देशभेदेनैषां बाल्यकानां व्यवस्थां ब्रूमः तदाह गार्ग्यः। शुक्रो गुरुः

सं-टी-
३५

प्राक्परतश्चबालोविंध्येदशावंतिषुसप्तरात्रं॥ वंगेषुहूणेषुचषट्चपंचशेषेतुदेशेत्रिदिनंवदंतीति॥ चंद्रस्यविशेषमा
हाद्बृहिमिति। विधोस्तेबाल्यवार्द्धकेक्रमेणाह्नीहेअहंचभवतः। बाल्यमर्द्धदिनेवार्द्धकंत्रिदिनेचंद्रस्येत्यर्थः। उक्तंच
वसिष्ठेन। हहत्वमिंदोस्त्रिदिनंदिनार्द्धंबालत्वमस्तत्वमहर्द्धपंच। अस्तेविधौमृत्युमुपैतिकन्याबालेन्यसक्ताविधवाच
वृद्धे॥ ननुत्रिविक्रमेरोगेकंदिनेचंद्रस्यबाल्यंप्रोक्तमितितस्यवाकास्यकागतिः॥ नकाचित्। किंतुनिर्मूलत्वादुपेक्ष्यमे
वतद्वाक्यं। साक्षाद्वसिष्ठेनापीदृगाहृषियेनोक्तमेकंदिवसंशिशुत्वमित्येतादिंदोस्तदयुक्तमत्र। महत्वशीघ्रत्वसुश्रा
मपत्वादिनार्द्धमेवाह्नजनिष्ठितत्वादिति। कश्यपनेतुबालोपींदुःशुभएवोक्तः। हद्बचंद्रःस्त्रियंहंतिपतिंहंत्यस्तमाग
तः। पतत्स्त्वमृतरश्पत्वाद्बालोपिशुभदःशशीति। अतएवसंपूर्णायामपिशुक्लप्रतिपदिद्वितीयादिनेद्वितीयायांश
तर्यज्ञोपवीतादीनिशुभकृत्यानिशिष्टाःसमाचरंति। अथैवंनिषिद्धकालमुक्त्वेदानींचौलमुहूर्त्तंस्रग्धरारयोद्धता
हृत्ताभ्यामाह॥ चूडावर्षात्तृतीयात्प्रभवतिविषमेऽष्टार्करिक्ताद्यषष्ठीपर्वोनाहेविचैत्रोदगयनसमयेज्ञेंदुशुक्रेज्य

राम
३५

69

कानां। वारेलग्नांशयोश्चास्तमनिधनततेनोनैधनेशुद्धियुक्ते शाक्रोपेतैर्विमैत्रैर्मृदुचरलघुभैरायषट्त्रिस्थपापैः
॥२९॥ क्षीणचंद्रकुजसौरिभास्करैर्मन्दतुशस्त्रमृतिपंगुताज्वराः॥ स्युःक्रमेणबुधजीवभार्गवैः केंद्रगैश्चशुभमि
ष्टतारया॥३०॥ तृतीयाद्वर्षादितिस्वल्पश्लोपे पंचमात्तेनगार्भाधानकालाज्जन्मकालाद्वा तृतीयेविषमेवर्षेपंचमेवा
सप्तमेवाचूडाच्चूडाकरणंप्रभवतिकृतंसच्छुभोदर्कंभवतीत्यर्थः यदाहवसिष्ठः। तृतीयेपंचमेब्देवास्वकुलाचा
रतोहितांचौलंशिशूनांयत्नेनस्वगृह्योक्तविधानतः। आधानतोजन्मतोवासप्तमाब्देपिकारयेत्। स्वकुला
चारतइत्यनेनयेषांकुलेपार्थक्येनचूडाकरणंतत्रमुहूर्तविचारः। येषांतूपनीत्यासहक्रियतइतिपक्षस्तेषामुपन
यनमुहूर्तेनसिद्धत्वान्नपृथङ्मुहूर्तविचारानुन्मेषः। अतएवोक्तंयाज्ञवल्क्येनचूडाकार्यायथाकुलमिति। म
नुनाप्रथममपिवर्षमुक्तं। चूडाकर्मद्विजादीनांसर्वेषामेवधर्मतः। प्रथमेऽब्देतृतीयेवाकर्तव्यंश्रुतिचोदना
त्॥ एवंबहुकालोक्तौयथागृह्यंव्यवस्थाद्रष्टव्यास्वगृह्येविशेषकालानुक्तौतुसमबलत्वात्सर्वेषांविकल्पः॥

विशेषमाह गुरुः। तृतीये ऽ ह्नि शिशोर्गर्भाज्जन्मतो वा विशेषतः। पंचमे सप्तमे वापि स्त्रियाः पुंसो ऽ थवा सममिति।
अष्टेति। अष्टमी। अर्का द्वादशी। रिक्ताः प्रसिद्धाः ४।९।१४ आद्या प्रतिपत्। षष्ठी प्रसिद्धा। पर्वाणि अष्टमी चतु
र्दशी पूर्णिमामावास्या संक्रांतयः। एतै रूनेरहितेऽहनि। अत्र तत्पुरुषसमासे राजाहःसखिभ्यष्टजिति टच्। न
स्त्वद्धित इति टिलोपः। अष्टम्यादितिथीस्त्यक्त्वाशेषतिथिषु चूडास्यादित्यर्थः। यदाह गुरुः। द्वादशीं चाष्टमीं रिक्तां
षष्ठीं प्रतिपदं तथा। हित्वा शेषासु तिथिषु क्षौरकर्म शुभावहं॥ कश्यपः। पंचपर्वतिथीं रिक्तां त्यक्त्वान्यदिवसे शु
भमिति। अत एवाह वसिष्ठः। पंचमी सप्तमी चैव दशम्येकादशी तथा॥ त्रयोदशी तृतीया च क्षौरकर्मसु खाव
हा इति। चकाराद्द्वितीयापि। ननु सप्तमी त्रयोदश्योर्गलग्रहत्वात्कथं तयोर्ग्रहणं। यदाह गुरुः। विद्यारंभो व्रतोद्देशः
क्षौरं चैव विशेषतः। गलग्रहे न कर्त्तव्यं पदीक्षेत्सु चजीवितमिति चेत्। उच्यते। वैदिकं मुंडनं चौलमित्युच्यते तद्विष
यको विधिः॥ अवैदिकं मुंडनं सुखार्थमिति यावत्तत्क्षौरमित्युच्यते क्षुरस्य कर्म क्षौरमिति सामान्यशास्त्रं तत्तद्विष

पकोनिषेधइतिवयंब्रूमः। अन्येदेशाचारतोव्यवस्थामाहुस्तद्युक्तं विरोधाभावात्॥ विचैत्रेति। चैत्ररहितेउत्तराय
णेचूडास्यात् शुभाशुभप्रकरणाभिहितोजन्ममासनिषेधोत्रापिध्येयः। तदाहराजमार्तंडः। उत्तरवर्त्मनिसवितु
रिचूडाकरणं जगुर्यवनाः। चैत्रंहित्वापापग्रहदिवसंजन्ममासंचेति। तथाहेंदुशुक्रेज्यकानांवारेलग्नांशयोश्चे
तिसौम्यग्रहवारेसौम्यग्रहाणांलग्नेकर्कमिथुनकन्यावृषतुलाधनुर्मीनानामन्यतमेलग्नेतेषामेववचनवांशेचूडा
स्यात्। चंद्रज्ञजीवशुक्राणांवारलग्नांशकेषुचेतिकश्यपोक्तेः। विशेषमाहपराशरः। सितेज्यसौम्यवारेषुक्षौरंप
क्षद्वयेहितं। इंदुवारःसितेपक्षेवाराःशेषानशोभनाइति। प्रयोगपारिजातेपापवाराणामप्यपवादःपठितः। पाप
ग्रहाणांवारेपिविप्राणांतुशुभोरविः। क्षत्रियाणांतुभूसूनुर्विट्शूद्राणांशनिःशुभइति॥ तथाऽष्टमनिधनततनौ
मेलग्नेराशिश्चस्वस्यमेष्टमेस्वभाम्यांनिधनमष्टमलग्नेतत्रविद्यतेयस्मिंस्तनोस्वजन्मलग्नजन्मराशिभ्यामष्टम
लग्नरहितेलग्नेचूडास्यादित्यर्थः। तथानैधनेऽष्टमस्थानेशुद्धियुक्तेशुद्धिःशुक्रव्यतिरिक्तसर्वग्रहराहित्यंतद्युक्ते

सतिचूडास्यात्। उक्तंच कश्यपेन। नैधने शुद्धिसंयुक्ते लग्नराशौ न नैधन इति। पराशरः। अष्टमस्याः ग्रहाः सर्वे नष्टाः
शुक्रविवर्जिताः। शुक्रश्च निधने क्रूरो सर्वसंपत्करः शिशोरिति॥ शाक्रेति॥ ज्येष्ठायुक्तैरनुराधारहितैर्मृदुचरलघुभि
र्द्वादशनक्षत्रैः तपलक्षिते काले चूडास्यात्। यदाह वसिष्ठः। अदितिद्वितये पौष्णद्वितये श्रवणत्रये॥ हस्तात्रितये
शाक्रे सेंद्रदेवे चौलमाहितं। कश्यपोऽपि। दास्रेन्द्वदितिपुष्येंद्रभेषु हस्तत्रये पेपिच॥ विष्णुत्रये च पौष्णर्क्षे चौलकर्म्म शुभ
प्रदमिति। अत्र विहितनक्षत्रेषु जन्मनक्षत्रं प्रशस्तमित्याह कश्यपः। नवान्नप्राशने चौले व्रतबंधेऽभिषेचने॥
शुभदं जन्मनक्षत्रमशुभं त्वन्यकर्मणीति। नारदादिवाक्यान्यन्नप्राशनेऽभिहितानि॥ अत्र केचित्। जन्मनक्षत्र
पदं तारापरं ज्ञेयमित्याहुः। तथाचोक्तं लल्लेन। हित्वैकं जन्मर्क्षं द्वे तारे जन्मसंज्ञिते शुभदे। उद्वाहे चोपनये यात्राप्रा
मन्नभोजने क्षुरे कार्य इति। तन्न। अवैदिकहोरविषयत्वात्तस्य। जन्मर्क्षे कर्म्म न कृत्रे इति गुरुवचनमपि तद्विषयमे
व॥ वैदिकहोरपरं चैतत्कश्यपादिवाक्यमिति समंजसं॥ ॥अथ लग्नबलमाह आयेति। एकादशषष्ठतृतीयस्था

न स्थितैः पापग्रहैश्चोपलक्षिते काले चूडा स्यात्। अथ षष्ठाष्टमारिगे चंद्रे यापेक्षा पारिसंस्थितैरिति कश्यपोक्तेः
।तथाह्णुशां चंद्रः ।कुजो मंगलः ।सौरिः शनिः ।भास्करः सूर्य एतैः केंद्रस्थैः क्रमेण यथासंख्यं मृत्युर्मरणं ।श
स्त्रमृतिः शस्त्रान्मृतिः पंगुता खंजत्वं ।ज्वरः प्रसिद्धः ।एतानि फलानि स्युर्भवेयुः ।बुधजीवभार्गवैस्तु केंद्रस्थैः शुभं
कल्याणकारिफलं चूडाकर्तुः स्यात् ॥ तदुक्तं रत्नमालायां ।क्षौरं हर्षुस्वकुलविधिना चोलमाहुर्मुनींद्राः केंद्रयातै
गुरुभृगुबुधैस्तत्र सूर्ये ज्वरः स्यात् ।शस्त्राद्घातो धरणितनये पंगुता चार्कपुत्रे शीतज्योतिष्यपि च तनौ निश्चितं नाशए
वेति ॥ केंद्रव्यतिरिक्तस्थाने फलमपि तन्नैव ॥ धनव्ययत्रिकोणगैरसद्ग्रहैर्मृतावपि ॥ क्षुरक्रियान शोभना शुभैस्तु पु
ष्टिकारिणीति। मृतौ तु शुक्र एव प्रशस्तो नान्ये शुभग्रहाः प्रागुक्तपराशरवाक्यस्वरसात्। क्षुरक्रिया चौलं ।इष्ट
तारयेति च पुनरिष्टतारया गोचरप्रकरणोक्तया शुभफलदतारया चूडा स्यात्। उक्तं च राजमार्तंडे नारविशुद्धौ
ग्रहकरणं रविगुरुशुद्धौ व्रतोद्वाहौ ॥ क्षौरं ताराशुद्धौ शेषं चंद्राश्रितं कर्मेति। ज्योतिर्निबंधेपि ।विवाहे सविता

शस्तो व्रतबंधे च वा कृतिः। क्षौरे ताराविशुद्धिश्च शेषे चंद्रबलं बलमिति॥ चौलप्रयोजनमाह वसिष्ठः॥ सर्वेषामेव वर्णानां चूडाकर्म्मविधिः स्मृतः। केशमूलं पिता ज्ञेयः केशाग्रं जननी तथा। चौलेनैवाम्बुषो वृद्धिश्चौलेनैवायुषः क्षय॥ तस्माच्चौलं प्रयत्नेन कार्यं बुद्धिमान्नरः इति। व्यवहारनिबंधे चौलारंभे विशेषमाह श्रीपतिः। केशवमानंतं पुरंपाटलिपुत्रं पुरीमहिच्छत्रां। दितिमदितिं च स्मरतां क्षौरविधौ भवति कल्याणमिति। यत्तु केचिदुक्तं चंद्रशुद्धिर्यदानास्ति ताराया श्च विशेषतः। अक्षौरभे पि कर्त्तव्यं वारेणाबुधसोमयोरिति तत्सामान्यक्षौरविषयं॥ ॥ अथ सगर्भायां स्वमातरि सत्यां शिशोश्चौलार्थं कालनियममनुष्टुभाह॥ पंचमासाधिके मातुर्गर्भे चौले शिशोर्न सत्। पंचवर्षाधिकस्येष्टं गर्भिण्यामपि मातरि॥ ३१॥ चौलाधिकारिणः शिशोर्मातुर्गर्भे पंचमासेभ्योऽधिके सति चौलं सत् शुभफलदात् नैनैव स्यात्॥ अतः पंचमासेभ्यः पूर्वं चौलं कृतं सच्छुभफलदमित्यर्थः। तदुक्तं गृह्यपरिशिष्टे॥ चूडाकर्म्म न कर्त्तव्यं यस्य माता तु गर्भिणी। करोति यदि मंदात्मा तदा गर्भस्य नाशनादि त्रीमृर्त्तिं वर्दत्यं केचदाद्यांतरे स्फुरमिति। वसिष्ठः॥ पु

त्रचूडाकृतौ माता गर्भिणी यदि वा भवेत्। विपद्यते गुरुश्चैव दंपती शिशुरद्वृतः। गर्भे मातुः कुमारस्य न कुर्याच्चौलकर्म च।
पंचमासादधः कुर्यादत ऊर्ध्वं न कारयेदिति॥ अस्यापवादमाह पंचेति पंचवर्षाधिकस्योल्लंघितपंचवर्षस्य शिशोर्मा
तरि गर्भिण्यामपि सत्यां पंचमासादध ऊर्ध्वं वा विहितकाले चौलमिष्टं कल्याणकारि भवेत् अतो वा लीयावत्पंचव
र्षो न भवति तावत्पर्यंतं निषेध इत्यर्थः। तदाह नारदः। सूनोर्मातरि गर्भिण्यां चूडाकर्म न कारयेत्। पंचाब्दात्प्राग
थोर्ध्वं तु गर्भिण्यामपि कारयेदिति। यदा तूपनयनेन सह चौलं चिकीर्षितं तदाविशेषमाह ज्योतिर्नारदः। सहोपनी
त्या कुर्याच्चेत्तदा दोषो न विद्यत इति। अत्र तु पंचवर्षाणां न्यूनाधिकभावो नापेक्षितः सर्वापवादकत्वादस्य। एवं पार्थि
केन मौंज्यपि सगर्भीयां संस्कार्यबालमातरि सत्यां न भवति। तदुक्तं। सूनोर्मातरि गर्भिण्यां मौंजीचूडे न कारयेत्। ग
ते तु पंचमे मासे गर्भादीनां मृतिर्भवेत्॥ ॥ अथ चौले ताराबलमावश्यकमित्युक्तं तत्र दुष्टयातारायां शान्तिमप
वादं च शालिन्याह ताराद्दोष्ये क्षुत्रिकोणेऽत्र गौ वा द्वौ रसत्स्यात्सौम्यमित्रस्ववर्गे। सौम्यैर्भेऽज्ञे शोभने तु ष्टताराश स्त्राशे

स॰टी॰
३८

यात्क्षौरयात्रादिकृत्ये ॥ ३२ ॥ ताराणां दुष्टत्वं गोचरप्रकरणेऽभिहितं तत्तत एवावधार्यं । तस्मात्तारादोषस्ये सत्यपि क्षौरं
चौलं सच्छोभनं स्यात् । कस्मिन्सति । अन्ते चंद्रे त्रिकोणगेन नवमपंचमस्थानस्थिते अथवोच्चगते वृषराशिस्थिते अ
थवा सौम्यानां बुधगुरुशुक्राणां वर्गे षड्वर्गे अथवा सुहृदां मित्राणां वर्गे अथवा स्वस्यैव षड्वर्गे सति । उक्तं च ज्योति
स्तंत्रे । सौम्यसुहृन्निजवर्गे चंद्रे तुंगत्रिकोणगे वापि । क्षौरादिकोपकरणे तारादोषेण न दोषायेति ॥ आदिशब्देनया
त्रा ॥ विपत्तारे गुडं दद्यादित्याद्येपि तारादोषस्यापवादाः प्रागुक्तास्ति एव ज्ञेयाः ॥ अथ शुभतारायां गुणमाह सौम्ये
इति ॥ सौम्ये भे विहिते नक्षत्रे सति अन्ते शोभने चंद्रे गोचरेऽनिष्टस्थानस्थिते सति तु दुष्टतारा समीचीना तारापि चेत्स्या
त्तदा क्षौरयात्रादिमंगलकृत्ये शस्ताऽतिप्रशस्ता निखिलदोषापवादिका स्यादित्यर्थः । एतदप्युक्तं ज्योतिस्तंत्रे ॥
ऋक्षं दग्धं तिथी रिक्ता चंद्रश्चाष्टमगस्तथा ॥ तत्सर्वं नाशयेत्तारा षट्चतुर्नवमी तथा । जन्माख्यष्टमी तारा न शु
भा नापि निंदितेति ॥ ॥ इति चौलप्रकरणं ॥ ॥ अथ चौलादिकृत्ये कालविशेषनिषेधमनुष्टुभाह ॥ अनुम

राम
३९

स्याः सूतिकायाः सूनोश्चौलादि नाचरेत्। ज्येष्ठापत्यस्य न ज्येष्ठे केश्चिमार्गेपि नेष्यते॥ ३२॥ ऋतुः स्त्रीधर्मः स यस्या अस्तीत्य
तुमती तस्यास्तथा सूतिकाया जातापत्यायाः सूनोः पुत्रस्योत्सवलक्षणं तथा कन्याया वा चौलोपनयनविवाहाद्युक्तं वक्ष्यमाणं
कर्म्म नाचरेत् न कारयेत्॥ उक्तं च प्रचेतसा। यस्य मांगलिकं कर्म्म तस्य माता रजस्वला। तदा समृतुमान्नेति पंचमं दिवसं
विनेति। अन्यच्च। विवाहोत्सवकार्येषु माता चेद्रजस्वला॥ वैधव्यं जायते तत्र नूनं नार्योः पाणिपीडने। पाणिपीडने वैधव्य
मन्यत्र मृत्युरित्यर्थः। सूतिकाया अपि कर्म्म नर्हकाल उक्तो विष्णुस्मृतौ। सूतिकां पुत्रवतीं विंशतिरात्रेण कर्म्माणि कारये
न्मासेन स्त्रीजननीमिति। अस्यार्थं केचिदाहुः॥ सर्ववर्णस्त्रीणां पुंप्रसूतानां बालकजन्मदिनाद्विंशतितमदिनं यावदशुचि
ता ततः शुद्धिः एवं कन्याप्रसूतानां स्त्रीणां कन्याजन्मदिनात्त्रिंशद्दिनं यावदशुचिता ततः शुद्धिरित्यर्थः॥ एतदन्ये नानुमन्यन्ते। यत
ः शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पंचदशाहेन शूद्रो मासेन शुद्ध्यतीति दृहेण वर्णपुरस्कारेणाशुचिताहान्युक्ता
नि। तत्र पुंजननपित्र्याब्राह्मणाया सूतकनिर्गमदिनाद्दशैवाशुचितादिनान्यवशिष्यन्ते। कन्याजननपित्र्यास्तु तस्यास्तस्मादेतद्विं

सं॰टि
८०

शतिदिनानि। क्षत्रियापास्तु पुंकन्याजननिमित्ताः क्रमाद्दशाष्टादशदिनानि तस्मात्कालाद्वशिष्यंते वैश्यायास्तु पुंकन्याजननिमित्ताः पंचपंचदशदिनान्यवशिष्यंते शूद्रायाः पुंजननिमित्ताद्दशदिनानि सूतककालेन्यूनानि जायंते। कन्याजननिमित्तास्तु दिनसाम्यमेवेति सर्ववर्णाननुगतमतिप्रसक्तमव्यापकं चलक्षणमापतति। अस्त्विति चेन्न। यद्येषोर्थोभिप्रेतः स्यात्तदा महता वाक्येनेममर्थंस्पष्टं निर्दिशेत्। अतोनुगतमः यंतिरमाद्रियन्ते। यथा। स्वस्ववर्णपुरस्कारेणाप्याशौचकालोऽभिहितस्तस्सर्वेषां तत्कुलजानां तुल्यएव॥ तदग्रे सर्वेपिस्तुचयः। पुंजननिमित्तस्तु सूतिकायास्तदग्रेविंशतिदिनान्यशुचित। कन्याजननिमित्तास्तदग्रेत्रिंशद्दिनान्यशुचितेत्यर्थः। अतएवसूतिकाया उक्तकालपर्यंतं कर्मानर्हत्वात्तदपत्यस्यापि मंगलकृत्ये निषेधः॥ ज्येष्ठेति। ज्येष्ठापत्यस्याद्यगर्भस्य पुत्रस्य कन्याया वा व्रतबंधविवाहादिशुभकृत्यं ज्येष्ठमासे न भवति॥ तदुक्तं रत्नमालायां॥ आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न तु जातु मंगलमिति॥ केचिदिति। मार्गेपि मार्गशीर्षमासेपि केचिदाचार्या आद्यगर्भसुतकन्ययोर्मंगलकृत्यं नेच्छंते। यदाहवात्स्यः। मार्गे मासे तथा ज्येष्ठे विवाहं चौलमेव च॥ ज्येष्ठ

राम
८०

पुत्रदुहित्रोश्चनकुर्वीतव्रतंतथा॥भारद्वाजोपि।मार्गशीर्षेतथाज्येष्ठे क्षौरंपरिणयंव्रतं।आद्यपुत्रदुहित्रोश्चयत्नेनप
रिवर्जयेत्।अस्मादेववचनात्प्रकारान्तरेणाद्यगर्भपुत्रदुहित्रोर्ज्येष्ठेमार्गशीर्षेचनमंगलकृत्यानांनिषेधः।किंतुविधिरिति
प्रतिभातिअत्रकश्चिद्विशेषोवक्तव्योस्तिसव्रतबंधप्रकरणेवक्ष्यते॥ ॥अथप्रसंगात्सामान्यक्षौरादिमुहूर्त्तंतत्रिविष
टकालंचशार्दूलविक्रीडितेनाह॥दंतक्षौरनखक्रियात्रविहिताचौलोदितेवारभेपातंगारविवीज्यविहायनवमंषष्ठंचसं
ध्यांतथा॥रिक्तापर्वनिशानिरासनरणग्रामप्रयाणोद्यतस्नाताभ्यक्तकृताशनैर्नहिपुनःकार्याहितप्रेप्सुभिः॥३४॥
चौलोदितेचौलप्रोक्तेषुवारेषुनक्षत्रेषुउपलक्षणत्वात्तदुक्तेलग्नेपिचदंतक्षौरनखक्रियादंतविलेखनक्रियाक्षौरक्रि
यानखविलेखनक्रियाचविहितोक्ता॥उक्तंच-----येषुयेषुप्रशंसंतिक्षौरकर्ममहर्षयः।तेषुतेषुप्रशंसंतिनखदंतवि
लेखनमिति।येषुयेषुवारनक्षत्रलग्नादिष्वित्यर्थः॥अथक्षौरेनिषिद्धकालउच्यते।पातंगीति।पतंगः।पक्षिसूर्ययोरि
त्यभिधानात्पतंगः सूर्यस्तस्यापत्यंपातंगिःशनिः।आररवीप्रसिद्धौएषांवारान्विहायतत्काउपलक्षणत्वादेषाल

ग्राविमकरकुंभमेषवृश्चिकसिंहाख्यानि त्र्यंशकांश्च विहायेत्यर्थः। उक्तं च वसिष्ठेन। हस्तत्रये पुष्यपुनर्वसौ च शशांकवि
ष्णुत्रितये। श्विनीषु पौष्णे द्विभिः क्षौरकर्म्म शस्तं व्यर्कारशन्यंशकवारलग्ने इति। अतः शुभग्रहाणां वारलग्नांशेषु क्षौरं का
र्यमिति फलितोऽर्थः। वारफलानि गर्गोक्तानि। भानुरायुः क्षपयति मासं सप्त रात्रेश्वरः। भौमो मासाष्टकं हंति ज्ञो यच्छे
त्पंचमासकं। राज्ञमासान्हरतीन्दुः सुरेज्यो दशमासकं। एकादशकविर्दद्यात्कृते तु क्षौरकर्म्मणीति॥ तुल्यन्यायत्वाल्ल
ग्नानामंशानां चैतानि फलान्यूह्यानि न केवलमायुर्हानिः किंतु शस्त्रघातोपि पापवारेषु। तदुक्तं वसिष्ठेन। आदित्यभौमा
र्किदिनेषु धीमान्न दंतकाष्ठं क्षुरकर्म्म कार्यं। कुर्वन्नवाप्नोति फलं समग्रं शस्त्रेण सम्यक्स्वशरीरघातं तथा नवमं घस्रं च
विहाय। यद्दिने क्षौरं कृतं ततो नवमदिने पुनः क्षौरं न कार्यं। उत्कटे भूषिते चैव याने नो नवमे हनीति नारदोक्तेः। यत्तु नव
मेन वम्यामिति व्याकुर्वंति। तदयुक्तं। दिनपदानुपदानप्रसंगात्। दिनपदं तिथिपरमिति चेत्। न। रिक्तायाः वक्ष्यमाणत्व
तेत्र निषेधानुपपत्तेः। ननु पृथगुपादानान्नवम्यां सर्वथा क्षौरं निंद्यमेव चतुर्थी चतुर्दश्योस्तु न तथा नेति चेन्न। चतुर्थी चैव

षष्ठीं च अष्टमीं च चतुर्द्दशीं ॥ तथा पंचदशीं चैव ब्रह्मचारी भवेत्सदा ॥ श्मश्रुकर्म्म शिरोभ्यंगं दंतधावनमैथुनं ॥ जंतुवै
तानियः कुर्याल्लक्ष्मीस्तत्र न तिष्ठतीति क्षौरे व्यासवचनेन चतुर्थीचतुर्द्दश्योः सर्वथा निषेधाभिधानात् ॥ अत एवामुम
र्थं स्फुरमाह पराशरः ॥ क्षौरं हात्रवमेत्वह्निनेष्टमात्मपि केषपीति ॥ तथा संध्या प्रातः संध्यां सायं संध्यां च विहाय ॥ एवं रि
क्तां ४।९।१४ विहाय ॥ पर्वाण्यपि ॥ निशां रात्रिमपि विहायेत्यर्थः ॥ अथाधिकारिणो निरूप्यंते ॥ हितमेप्सुभिः स्वप्सुमोदकैः
मिच्छद्भिरेतादृशैः क्षौरक्रियाहि निश्चयेन न कार्या कीदृशैः ॥ निरासनैरासनं केवलादिगतद्वहितैः ॥ रणः संग्रामः ॥ ग्रामो
जनपदविशेषः ॥ प्रयाणमर्थयात्रा ॥ एतदर्थमुद्यतैः कृतोद्योगैः ॥ स्नातैरनुष्ठितनिमज्जनैर्नित्यककाम्यस्नानैः ॥ यत्तु क्षौरार्थमेव
स्नानं विधीयते प्रायश्चित्तादौ च तत्र नायं निषेधस्तथैव तस्य विधानात् ॥ अभ्यक्तैः कृततैलाभ्यंगैः ॥ कृताशनैः कृतभोजनैः
सुवर्णाद्यलंकारभूषितैरित्यपि ध्येयं ॥ यदाह वराहः ॥ न स्नातमात्रगमनोत्करभूषितानामभ्यक्तभुक्तरणकालनिरासनानां ॥
संध्यानिशाशनिकुजार्कदिने च रिक्ते क्षौरं हितं न नवमेह्नि न चापि विष्ट्यामिति ॥ उत्कटानां कुक्कुटासनवदवस्थितानां ॥ संध्या

स॰टी॰
४२

लक्षणामपि विवाहे रणोक्तं । अर्द्धास्तमिता दुदिता त्सूर्याद स्पष्टभं नभो यावत् । तावान्संध्याकालइति । मरीचिः । षष्ठ्यां पर्वसु
पक्षाद्यौ रिक्ताभद्रा तिथिष्वपि । पाते श्राद्धे विवाहे च क्षौरं वर्ज्यं निशासु चेति वृद्धगार्ग्यः । शन्यारशिवारेषु राज्ञो पाते व्रतोःहनि
॥ श्राद्धाहे प्रतिपद्रिक्ताभद्रा क्षौरेपि वर्जयेत् । षष्ठ्यमापूर्णिमापात श्चतुर्दश्यष्टमी तथा । श्राद्धसंनिहिते पापं तिलेमांसे
क्षौरे भगइति ॥ अथ केषांचिन्निमित्तविशेषे क्षौरस्य विधिनिषेधौ मंजुभाषिणीछंदसाह ॥ ऋतुपाणिपीडमृतिबंधमोक्ष
णक्षुरकर्म्म वह्विजनृपाज्ञयाचरेत् । शववाहतीर्थगमसिंधुमज्जनक्षुरमाचरेन्न खलु गर्भिणीपतिः ॥ ३५ ॥ अत्र पूर्वा
र्द्धं सत्स्वपि निषिद्धवारादौ एषु कर्म्मसु क्षुरकर्म क्षौरं सद्यः कार्यमितिवाक्यार्थः । ऋ । ऋतौ यज्ञे विप्राज्ञया क्षौरं । तथापा
णिपीडे विवाहो लक्षणया तत्रः श्राद्धविनियोगे दानकर्माणि ॥ केचित्तु विवाहे श्मश्रुकर्म्म प्राशस्त्यपरं क्षौरमित्याहुः । अत्र
परे शाखाविशेषेण विवाहे क्षौरमुक्तमिच्छुः । तथा चाह श्रुतिः न मुण्डपितारः श्राविष्ठायनावश्मूदामित्यादिमंत्रौमा
तापित्रोर्मरणे । --- बंधमोक्षणे कारागृहे बद्धस्य पश्चात् मोचनं भवेत्तदा । द्विजाज्ञया यज्ञादौ व्रतिप्राप्त्याख्यातं । नृपो

राम
४२

राजा तस्याज्ञया चौरादेः क्षौरं कार्यमेव। यदाह नारदः। नृपविप्राज्ञया यज्ञे मरणे बंधमोक्षणे। उद्वाहे ऽखिलवारर्क्षतिथि
षु क्षौरमिष्टमिति॥ धर्म्मशास्त्रे गंगायां भास्करक्षेत्रे मातापित्रोर्मृते ऽहनि। आधाने सोमपाने च षट्सु क्षौरं विधीय
त इति। अन्यच्चात्रैव। राजकार्यनियुक्तानां नराणां रूपजीविनां। श्मश्रुरोमनखच्छेदे नास्ति कालविशोधनमिति। अ
थ शवेति। गर्भिणी गर्भवती तस्याः पतिर्भर्त्ता शववाहं मृतकवहनं तीर्थगमनं तीर्थयात्रां उपलक्षणत्वाद्विदेशगमनम
पि सिंधुमज्जनं समुद्रस्नानं क्षौरं क्षुरकर्म्म एतानि कर्माणि न आचरेन्न कुर्यात्। यदाह वसिष्ठः। गृहनिर्माणमुदधिस्नानं
चौलं सुतस्य तु। तीर्थयात्रां नखश्मश्रु न कुर्याद्गुर्विणीपतिः। गालवः। दहनं वपनं चैव चौलं च गिरिरोहणं। नावमारोह
णं चैव न कुर्याद्गर्भिणीपतिः। धर्म्मशास्त्रे तु विशेषः। सिंधुस्नानं द्रुमच्छेदं वपनं प्रेतवाहनं। विदेशगमनं चैव न कुर्याद्गर्भि
णीपतिः। राजा योगी पुरंध्री च मातापित्रोस्तु जीवतोः। मुंडनं सर्वतीर्थेषु न कुर्याद्गर्भिणीपतिः। अयं च क्षौरादिनिषे
धो गुर्विणीपतेः सप्तममासादूर्द्धं न प्राक्। यदुक्तं नारदीये। वपनं मैथुनं तीर्थं वर्जयेद्गुर्विणीपतिः। श्राद्धं च सप्तमान्मासा

ऽस्योदये वा।। पूर्वाह्णे त्रिमेत्रोऽष्टकः पंचपितृमोदतो वर्षमात्क्षौरकृन्मृत्युमेति।।३६।। क्षौरं नैमित्तिकं तत्क्षौरनक्षत्रे सति पंचमे २

हूर्ध्वं चान्यत्र वेदवित्।। श्राद्धं श्राद्धभोजनं। इदमुत्तरार्द्धं गतप्रमेयं गर्भाधानप्रकरणे वक्ष्यमपि प्रसंगादत्रैवोक्तं यं
पकृतेति।। ।।अथ क्षौरे राज्ञां विशेषं सर्वथा वक्ष्यन् नक्षत्राणि च भुजंगप्रयातेनाह।। नृपाणां हितं क्षौरभे श्मश्रुकर्म
दिने पंचमे पंचमे पंचमेऽपि पंचमे एव दिने श्मश्रुकर्म मुख्यशोभाकारि क्षुरकर्म नृपाणां राज्ञां हितं प्रशस्तं।। पदाह वसिष्ठः।। मही
भृतां पंचमपंचमेह्नि क्षौरं च कार्यं हितमुक्तभेषु।। ननु पंचमे पंचमे इति वीप्सोक्त्या नियमप्रतीतेर्विहितनक्षत्राभावे च
सति श्मश्रुकर्माकरणमेव स्यादित्यत आह। अस्योदये वेति। वाऽथवा अस्य क्षौरभस्योदये श्मश्रुकर्म कार्यमिति।। उक्तं
च वसिष्ठेन। न लभ्यते चेत्तु तदुक्तधिष्ण्यं तल्लोदये वा निखिलं विधेयमिति। उदयशब्देन मुहूर्त्त इति कश्चिद्व्याकुर्वते। तदा
ह गर्गः। क्षौरकर्म महीशानां पंचमे पंचमेऽहनि। कर्त्तव्यं क्षौरनक्षत्रे यथवा तन्मुहूर्त्तके इति। तेषां क्षौरनक्षत्राणां येस्वा
मिनस्तेषां मुहूर्त्तेष्वित्यर्थः। तांश्च मुहूर्त्तान् विवाहप्रकरणे वक्ष्यति।। अत्र क्षौरकर्मपदं श्मश्रुकर्मपरं। राजायोगात्पुरश्री
च माता पित्रोस्तु जीवतोः। मुंडनं सर्वतीर्थेषु न कुर्याद्गर्भिणीपतिरिति राज्ञो मुंडननिषेधः। तत्र अत एवोक्तं श्रीपति

ना। श्मश्रुकर्म्म पंचमे पंचमेह्नि भूभृता। क्षौरभे स्वोदये नैधनतारकां च वर्जयेदिति। निधनतारकाः जन्मत्रिपंचसप्ततारा:।
अन्ये त्वेवं व्याचक्षते: स्वोदये वेति। अस्य क्षौरभस्योदये लग्ने। यथा। मेषलग्नं त्रिंशद्भागात्मकं तत्राद्यास्त्रयोदशभागा: स
र्विंशतिलिप्ता यावता कालेन मेषलग्ने उदयं यांति तावदश्विनी नक्षत्रमुदयं यातीति ज्ञेयं तदनंतरं तावंत एवांशा यावता
कालेनोदयं यांति तावद्भरण्युदय इत्यनेन न्यायेन सर्वेषां नक्षत्राणामुदयो ज्ञेय:। इयं च व्याख्या वराहपद्यव्याख्यावस
रे भट्टोत्पलेनाभ्यधायि।। पितृचरणास्त्वेवं व्याकुर्वते। यस्मिन्काले: अश्विन्या उदयक्षितिजसंबंध: संपद्यते तं समयमारभ्य
यावद्भरण्या उदयक्षितिजसंबंधस्तदंतराले यावान्कालः सोश्विन्या उदय उच्यते। एवं समुदयलग्नद्वयांशांतरालाद्गणि
तमार्गेण यावानिष्टकाल आगच्छेत्स एव तन्नक्षत्रोदय इति निष्कृष्टोर्थ:।। नक्षत्रस्योपलक्षणत्वाच्छुभवारासंभवेपि
तद्धोरायां कार्यं। उक्तं च नारदेन। यस्य खेटस्य यत्कर्म्म वारे प्रोक्तं विधीयते। ग्रहस्य क्षणवारेपि तस्य तत्कर्म्म सर्वदेति।
क्षणवार: कालहोरा।। एवं सति निषिद्धदिननक्षत्रवारेपि श्मश्रुकर्म कार्यमिति युक्तमुत्पश्याम:।। षड्ग्निरिति।। अ

सं-टि-
४४

ग्निः कृत्तिका। क्षौरा ह मासषड्वारं कृत्तिकायस्य सः। एवं त्रीणि मैत्राणि अनुराधाः यस्य। अष्टौ कारोहिण्यो यस्य। पंच पित्र्याणि
मघा यस्य। अत्र पश्चात्तारोर्यमणा उत्तराफाल्गुन्यो यस्य स एतादृशः क्षौरकृद्वृत्तो वर्षादनंतरं मृत्युं मरणमेति प्राप्नो
ति। यदाह वसिष्ठः। अष्टावुडुन्वह्निः पित्र्यपंचकस्य च षड्वह्निविधिस्य चतुरर्यम्णक्षः। त्रिमैत्रभः पद्मजसन्निभोपि क्षौरानरो
द्वा निधनं गतः स इति॥ पद्मजो ब्रह्मा तत्सन्निभस्तद्दृशस्तदुपादानं कैमुतिकन्यायसूचनार्थं॥ ननु रत्नमालापद्ये षट्कृ
त्तिकः पंचमघस्त्रिमैत्रो ब्राह्माष्टको पंच तु सत्तरश्च॥ क्षौरी सवर्षं चतुराननो पि न प्राणिता ति प्रकारः प्रवादः इत्यत्र सामा
न्यतस्ति स्मरणाम् अप्युत्तराणां ग्रहणाद्विरोध इति चेत्॥ मैवं वोचः। अत्राप्युत्तरापदेन प्रथमोपस्थितिकत्वाद्वसिष्ठवाक्येन
सहैकवाक्यतानुरोधाच्चोत्तरफल्गुन्येव गृह्यते न तु षष्ठाभाद्रपदे॥ यत्र तु वचनांतरविरोधो नास्ति पौष्णमारुतमघोत्तराश्वि
नैरित्यादौ तत्र सामान्यतः सर्वासामुत्तराणां ग्रहणं भवति॥ ॥ इति क्षौरप्रकरणं॥ ॥ अथ प्रासन्नकालतादक्षरारं। अमु
हूर्तेषु पंचचामरछंदसाह। गणेशविष्णुवाग्रमाः प्रपूज्य पंचमाब्दके तिथौ शिवार्कदिग्द्विषट्शरत्रिके रवावुदक्। लघु

राम
४४

87

श्रवोनिलांत्यमादितीशतक्षमित्रभेचरोनसत्रनौशिरोर्लिपिग्रहः सतांदिने॥३७॥गणेशविष्णुप्रसिद्धौ।वाक्सरस्वती
।रमालक्ष्मीश्च एता देवताः प्रपूज्यपंचमवर्षेसतिशिवाएकादशी॥अर्कोद्वादशी।दिग्दशमी।द्वौद्वितीया।षट्षष्ठी।शरा
ःपंचमी॥त्रयस्तृतीयाएतासामन्यतमतिथौचसति।रवौउदक्उत्तरायणस्थितेसति।तथालघुनक्षत्राणिहस्ताश्वि
पुष्याः।ध्रुवः श्रवणः अनिलांत्यमादित्यः प्रसिद्धाः।ईशआर्द्रातक्षाचित्रा।मित्रभमनुराधा।अत्रसमाहारद्वंद्वः।
एतेषामन्यतमनक्षत्रेसति।तथासतांसोमबुधगुरुशुक्राणांदिनेदिवसेतथाचरराशयोमेषकर्कतुलामकराः
द्विहितेशुभस्वामिकेवृषमिथुनकन्याधनुर्मीनानामन्यतमलग्नेसतिशिशोर्लिपिग्रहोनूतनाक्षरलिखनप्रारंभः
कार्यः।उक्तंचवसिष्ठेन।उदग्गतेभास्वतिपंचमेऽब्देप्राप्तेऽक्षरस्वीकरणंशिशूनां।सरस्वतींविघ्नविनायकंचगुरूंद
नाद्यैरभिपूज्यकुर्यात्॥मार्कंडेयः।पूजयित्वाहरिंलक्ष्मींदेवींचैवसरस्वतीं।स्वविद्यासूत्रकारांश्चस्वांचविद्यांविशे
षतः।प्राप्तेतुपंचमेवर्षेअप्रसुप्तेजनार्दने।षष्ठींप्रतिपदंचैववर्जयित्वातथाष्टमीं।रिक्तांपंचदशींचैवसौरिभौ

सं·टी·
४५

मद्दिनं तथा। एवं मुनिश्चिते काले विद्यारंभं तु कारयेत्॥ अत्र षष्ठी निषिद्धा। ग्रंथे स्वीकृतेति चिंत्यं। प्रयोगपारिजाते श्रीध
रः। हस्तादित्यसमीरमित्रपुरजित्सौम्याश्विचित्राच्युते धारार्कीशदिने दपादिरहिते लग्ने स्थिरे चोभये। पक्षे पूर्णनिशाक
रे प्रतिपदं रिक्तां विहायाष्टमीं षष्ठ्यमष्टमशुद्धिभाजिभवने प्रोक्ताक्षरस्वीकृतिरिति। पुरजिदार्द्रा। उभये द्विस्वभावरा
शी। अत्र वचने पुष्यानुपादानं। ग्रंथे लघुपदेन कृतमिति चिंत्यं॥ ॥ अथैवमक्षरग्रहणोदृष्टे संजाते सति विद्यारंभमु
क्तं तत्र पंचचामरेणाह॥ मृगात्कराच्छ्रुतेस्त्रये ऽश्विमूलपूर्विकात्रये गुरुद्वये ऽर्कजीवविन्सितेऽह्नि षट्शरत्रिके। शि
वार्कदिक्द्विके तिथौ ध्रुवांत्यमित्रभे परैः शुभैरधीतिरुत्तमा त्रिकोणकेंद्रगैः स्मृता॥ ३५॥ मृगात्त्रये मृगार्द्रापुनर्वसु
षु करात्त्रये हस्तचित्रास्वातिषु श्रुतेः श्रवणात्त्रये श्रवणधनिष्ठाशततारकासु। अश्विन्यां। मूले। पूर्विकात्रये पूर्वाफल्गु
नीपूर्वाषाढापूर्वाभाद्रपदासु। गुरुद्वये। पुष्याश्लेषयोः। तथा सूर्यगुरुशुक्रवाराणां दिने च सति अधीति सर्वविद्यानाम
ध्ययनमुत्तमा स्मृता। प्रदाह श्रीपतिः। मृगादिपंचस्वपि भेषु मूले हस्तादिके च त्रितये ऽश्विनीषु। पूर्वात्रये च श्रवणे च

राम
४५

89

तद्वद्विद्यासमारंभमुशंतिसिद्धौ इति॥ तद्वदिति श्रवणत्रयेइत्यर्थः। तत्स्पष्टमुक्तं महेश्वरेण। हस्तादित्रितये तथाश्वि
न्यतिभे पूर्वात्रये भेषश्विभे मित्रर्क्षे च मृगादिपंचसु शुभः प्रारंभ आद्यैः स्मृतः॥ विद्यानां हरिभात्रये च दिवसे सूरेर्भृगो
र्वा विदोः नभ्रापात्व्यतदाप्यवर्जिततिथौ केंद्रस्थिते सद्ग्रहे रिति। अयमेव च ग्रंथकृदाशयः। वयं तु तद्वदिति पदं विद्या
समारंभपदेन संबद्धमस्तीति व्याकुर्मः। अत एवाह वसिष्ठः। पूर्वात्रये मूलमृगादिपंचस्वाश्विनीश्रुतित्रये च हस्तात्।
सविष्णुधिष्ण्ये प्रथमस्तु विद्याप्रारंभ इष्टः शुभवासरेष्विति। यद्योषोऽभिप्रायेण स्यात्तदा पूर्वात्रये च श्रवणत्रये चेति व्या
ख्या श्रीपतिः। अनयोर्वाक्ययोर्यथासंप्रदायं व्यवस्था॥ शुभवासरं व्यतिरिक्ताः शुभवासरा गृह्यंते। यदुक्तं रत्न
मालायां। विद्यारंभः सुरगुरुसितज्ञेष्वभीष्टार्थदायी कर्तुश्चायुश्चिरमपि करोत्यंशुमान्मध्यमोऽत्र। नो हार्योऽसौ भवति ज
डता पंचता भूमिपुत्रे छायासूनावपि च मुनयः कीर्तयंत्येवमाद्या इति। नो हारो हिमं॥ यत्तु भोजेनोक्तं॥ विद्यारंभे गुरुः श
श्रेष्ठो मध्यमौ भृगुभास्करौ। मरणं शनिभौमाभ्यामविद्या बुधसोमयोरिति। अविद्या अनवधारणमन्यथाज्ञानं वा॥ तदे

सं-टी-
४६

तद्धनुर्विद्याविषयं।तद्वाक्यमधुनैवमयावक्ष्यते॥ षडिति।षष्ठी पंचमी तृतीयैकादशी द्वादशी द्वितीया नाम स्मृतमति
थ्यावधीतिः कार्या। अनध्यायाप्राप्तमतद्दोषवर्जितं स्यादिति महेश्वरोक्तेः॥ अनध्यायांस्तु तत्रैव वक्ष्यति। ऋक्वेति। अत्रा
पि शब्दाध्याहारः।ग्रंथोयोऽप्यस्तथासत्समन्येरतवार्थे-- समित्र भे रोहिणीपत्ररात्रपरेवत्स्यनुराधास्वप्यधीतिरुत्तमा। एतद
पि धनुर्विद्याविषयं। तदुक्तं दीपिकायां॥ अदिति गुरुपुष्यार्क स्वाति चित्राश्विपित्र्यश्रवहरिवसुमूलाश्वी दुभाग्यापात्य भेषु
॥ विशनिशशिबुधाहे विस्नुवोधेषिणोषे सुसमयतिथियोगेचापविद्याप्रदानमिति। ग्रंथेनुराधोक्तिस्तु महेश्वरवाक्य
लोचनेन॥ अथ लग्नबलं शुभैः ग्रहैः त्रिकोणकेंद्रगैः सद्भिरधीतिरुत्तमा स्मृता। केंद्रस्थितैः सद्भिरित्युक्तेः केंद्रग्रह
णां त्रिकोणोपलक्षणं॥ विशेषमाह नृसिंहः॥ शुभाः पापाश्चरं प्रस्थाः सर्वे नेष्टाः सदा ग्रहाः॥ ध्यानस्थ प्रष्ठायकर्मस्थाः प्र
पाः सर्वे शुभावहाः। शुभाः केंद्रत्रिकोणस्थाधनध्यानगताः शुभाः। सर्वेलाभे प्रशस्ताः स्युः क्रूरग्रहणोशिशोरिति। अ
क्रूरग्रहणां विद्योपलक्षणं॥ ॥इति विद्यामुहूर्तः॥ ॥ अथ समस्तशुभकर्मभ्यः प्राग्विहितोऽकुरार्पणमुहूर्तोग्रंथ

राम
४६

क्लृप्तनुक्तोऽयस्माभिरुच्यते॥ तत्र प्राकृततृतीयपंचमसप्तमनवमदिवसेषु सौम्यवारेषु बीजवापोक्तनक्षत्रेष्वंकुरारो
पणं कार्यं। यदाह नारदः॥ कर्त्तव्यं मंगलस्यादौ मंगलायांकुरार्पणं॥ नवमे सप्तमे वापि पंचमे दिवसेऽपि वा॥ तृतीये वी
जनक्षत्रे शुभवारे शुभोदये॥ सम्यग्गृहाण्यलंकृत्य वितानध्वजतोरणैः। आशिषो वाचनं कार्यं द्विजैः पुण्यांगनादि
भिः। सह वादित्रनृत्याद्यैर्गत्वा प्रागुत्तरां दिशं। प्रागुत्तरामैशानीं॥ तत्र मृत्तिकं तत्स्थलं गृहीत्वा पुनरागतः। मृन्मये
ष्वथवा सम्यग्वेणुपात्रेषु पूरयेत्। अनेकबीजसंयुक्तं तोयपुष्पोपशोभितं॥ शौनकः॥ आधानं गर्भसंस्कारे जातकर्म्म
च नामच। हित्वान्यत्र विधातव्यं मंगलेऽकुरवापनं॥ प्रदोषकाले कुर्वीत पूर्वाह्णे वा न रात्रिषु। बालककर्म्मणि काले चस्या
द्विवैवांकुरार्पणं॥ गुरुः। आसंनतिकेषु कार्येषु कार्यं सद्योऽकुरार्पणं॥ काश्यप कालविधाने तु विशेषोऽभिहितः। हस्त
स्वाती विरिंचासुरपितृमुरजिन्मित्रपौष्णार्यसार्प्यपाथोनाथोत्तरासु क्रिययुवतिधनुर्वृश्चिकान्त्यद्वारिके॥ हित्वा पर्व
सुरेज्यामरगुरुशशिविद्वारलग्नांशके स्याद्युन्नैर्बीजवापः शशिनि शुभयुते वाष्टमे शुद्धियुक्ते इति॥ असुरोमूलं

मं-टी-
४७

॥पाथोनाथः शततारका॥ ॥इत्संकुराप्पर्णमुहूर्त्तं॥ ॥अथव्रतबंधइति॥विंशतिपद्यैःप्रोच्यतइतिशेषः॥तत्र
व्रतबंधप्रयोजनमाहकश्यपः॥ अथातः संप्रवक्ष्यामिचोपनायनमुत्तमं॥द्विजत्वकरणंप्रोक्तंतस्मात्तत्कर्मप्रसाध
नं॥ आद्यंसर्वाश्रमाणांचदेहसंस्कारकारणं॥अनेनकर्म्मणासर्वेसंस्कृताःसर्वदेहिनः॥तत्संस्कारंलग्नवशात्
स्माल्लग्नंप्रवक्ष्यतदिति॥तस्यकालस्त्रिविधोनित्यःकाम्योगौणश्च॥तत्रक्रमेणत्रिविधमपिकालंशार्दूलविक्री
डितेनाह॥विप्राणांव्रतबंधनंनिगदितंगर्भाज्जनेर्वाष्टमेवर्षेवाप्यथपंचमेक्षितिभुजांषष्ठेतथैकादशे॥वैश्यानां
पुनरष्टमेप्यथपुनःस्याद्द्वादशेवत्सरेकाले ऽथद्विगुणेगते निगदितेगौणंतदाहुर्बुधाः॥३९॥अत्रनित्यंकाम्यंचता
वदुच्यते॥विप्राणांब्राह्मणानांगर्भाष्टमेगर्भदिनमारभ्याष्टमेसौरवर्षे ऽथवाजनेस्तत्तिदिनात्सौरवर्षे ऽष्टमेसतिव्र
तबंधनंनिगदितं॥इदंनित्यं॥अथकाम्यं॥विप्राणामेवपंचमेगर्भाज्जनेर्वावर्षेकार्यंव्रतबंधनं॥एवंक्षितिभुजांक्षत्रि
याणांगर्भाज्जनेर्वाषष्ठेवर्षेकाम्यमुपनयनं॥तथागर्भाज्जनेर्वाएकादशेसौरवर्षेनित्यमुपनयनं॥वैश्यानांपुनस्त

थैवाष्टमवर्षे काम्यमथर्तव्येव पुनर्द्वादशे वत्सरे वर्षे नित्यमुपनयनं॥ यदाह नारदः। आधानादष्टमे वर्षे जन्मतो वा
ग्रजन्मना॥ राज्ञामेकादशे मौंजीबंधनं द्वादशे विशामिति। अत्राचेष्ट्याधिकरणन्यायेन राजपदं क्षत्रियपरं। अत्र
फलाश्रवणान्नित्यमिति वक्ष्यते। तथा काम्यकालमाह मनुः। ब्रह्मवर्चसकामस्य कार्यो विप्रस्य पंचमे राज्ञो बलार्थि
नः षष्ठे वैश्यस्यार्थार्थिनोऽष्टमे इति॥ अत्र फलश्रवणात्काम्यकालता। पैठीनसिना गर्भपंचमेपि व्रतबंधनमुक्तं॥
गर्भपंचमेऽब्दे ब्राह्मणमुपनयेदिति। तुल्यन्यायत्वात् क्षत्रियविशोरपि गर्भषष्ठे गर्भाष्टमे चेति द्रष्टव्यं॥ यत्तु गर्भाष्टमे
षु ब्राह्मणमुपनयेद्गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यमित्यापस्तंबगृह्यसूत्रे गर्भाष्टमेष्वित्युक्तं तत्र गर्भाष्टमे
ष्विति बहुत्वान्यथानुपपत्त्या गर्भषष्ठगर्भसप्तमगर्भाष्टमेषु सौरवर्षेष्विति हरिहरव्याख्यानात्त्रयाणामपि नित्यका
लता॥ एवं गर्भैकादशेष्विमादावपि व्याख्यानं ज्ञेयं। तच्च स्वाध्यायविषयम्। केचित्तु पंचमवर्षादारभ्य षोडशवर्षपर्यंत
काम्याः काला इत्याहुः। वराहविष्णुप्रकाशपद्धे आपस्तंबः। पंचमे विद्यापुत्रकामः षष्ठे तु धनकामः सप्तमे ब्रह्मवर्चस

ताबा

सं॰टी॰
४८

कामोऽष्टमेआयुष्कामोनवमेतेजस्कामोदशमेन्नाद्यकामएकादशेइंद्रियकामोद्वादशेपशुकामस्त्रयोदशेजयकाम
श्चतुर्दशेपौरुषकामःपंचदशेपूर्णकामःषोडशेराज्यकामइति॥तदप्यापस्तंबशाखाध्यायिविषयंद्रष्टव्यमष्टमेपि
~~तिवृद्धत्वात्मपक्षानुपपन्नमागर्भेषष्ठमार्भसप्तममगर्भाष्टमेमुख्योरवेषेषिलितिहतितिल्आस्यमानात्रयाणामपिनित्यकाललं~~
॥अयंगौणकालउच्यते॥निगदितेषोडशेगर्भोज्जनेर्वाष्टमेइत्यादिकेकालेतस्मिन्द्विगुणितेगतेगंतुंप्रवृत्तेआदि
कर्मणिकः॥तथासतितद्भूतवंधनेगौणकालमाहुः॥यथास्वस्वोक्तनित्यकालात्ब्राह्मणस्यषोडशवर्षपर्यं
तंक्षत्रियस्यद्वाविंशतिवर्षपर्यंतंवैश्यस्यचतुर्विंशतिवर्षपर्यंतंगौणमित्यर्थः॥यदाहमनुः॥आषोडशाद्ब्राह्मणस्य
सावित्रीनातिवर्तते॥आद्वाविंशात्क्षत्रबंधोराचतुर्विंशतेर्विशः॥क्षत्रबंधोःक्षत्रियस्य॥अतऊर्ध्वंत्रयोप्येतेयथाका
लमसंस्कृताः॥सावित्रीपतिताव्रात्याभवंत्यार्यविगर्हिताइति॥गौणकालातिक्रमेपियाज्ञवल्क्येनविशेषोभिहि
तः॥अतऊर्ध्वंपतंत्येतेसर्वधर्मवहिष्कृताः॥सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोरिति॥अतएवतव्राह्मणाःपतन

सा॰श्रा॰१

राम
४८

मृच्छतीति गौतमस्मरणमपि संगच्छते। अत्र ब्राह्मणग्रहणं त्रैवर्णिकोपलक्षणमन्यथा सावित्रीपतिता व्रात्या इति व
द्वचनमनर्थकमापद्येत॥ अथ व्रतबंधेन कृत्वादिकं वसंततिलकयाह द्विप्रक्षबाहिचरमूलमृदुत्रिपूर्वारौद्रेऽर्के
विहस्तमितेंदुदिने व्रतंसत्॥ द्वित्रीषुरुद्ररविदिक्प्रमिते तिथौ च कृष्णादिमत्रिलवकेपि न चापराह्णे॥ ४०॥ नन्विदमयुक्तं
प्रतिभाति। त्रैवर्णिकस्यात्रिविधमपि कालमभिधायेदानीमेतेषु मासेषु व्रतबंधः कार्य इति वक्तुमुचितं तद्विहायैव न
कृत्वायुक्तमिति चेत्॥ उच्यते। अहो देवानांप्रियस्य महदज्ञानविलसितं यत गायत्रीणां वृषप्रतिष्ठमादिपद्यं न बुद्धावजा
गरीत्तरामिति। यतो द्विविधः काल उत्तरायणरूपो दक्षिणायनरूपश्चेति तत्र दक्षिणायने व्रतबंधनिषेधादुत्तरायणं मास
षट्कात्मकं प्रशस्तमित्यर्थात्सिद्ध एव। यथा अभक्ष्यो ग्राम्यशूकर इत्युक्ते आरण्यः शूकरो भक्ष्य इति गम्यते। मुक्तास्तेन
कर्तव्यमित्युक्ते मुक्तोदये कर्तव्यमिति भवद्वदनादेवावसीयते। अत एव व्रतबंधे नारदेनोक्तं। दृश्यमाने गुरौ मुक्ते शास्ते
शेचोत्तरायणे इति॥ एवं सत्यपि किंचिद्विशेषावगत्यर्थं मासा उच्यंतेस्माभिः। तत्र वसंते ब्राह्मणस्य ग्रीष्मे क्षत्रियस्य श

सं·टि·
४९

रहितैश्यस्य मुख्यकालमुपनयनं। माघादिपंचमासेषु तु त्रैवर्णिकस्य साधारणकालमिति। यदाह वसिष्ठः। विप्राणा
मुपनयनं वसंतसमये धराधिनाथानां। ग्रीष्मत्रौ शरदि विशां मासाः साधारणा स्वमाघाद्या इति। कश्यपोपि। अतोव
संते विप्राणां ग्रीष्मे राज्ञां शरद्यथा विशां मुख्यं च सर्वेषां द्विजानां चोपनायनं। साधारणं च मासेषु माघादिषु च पंचसु॥
एषां मासानां फलान्याह नारदः। स्वकुलाचारधर्मज्ञो माघमासे तु फाल्गुने। विधिज्ञ स्वार्थवान्मैत्रे वेदवेदांतपारगः
॥वैशाखे धनवान्वेदशास्त्रविद्याविशारदः। उपनीतः कुलाढ्यः स्याज्ज्येष्ठे विधिविदां वर इति॥ अत्र केचिच्चैवं उक्तवराद्ये
मीघादिषण्मासानां फलान्यभिहितानि॥ ॥माघे द्रविणशीलाढ्यः फाल्गुने च दृढव्रतः। चैत्रे भवति मेधावी वैशा
खे कोविदो भवेत्। ज्येष्ठे तु गहनी तिज्ञ आषाढे क्रतुभाग्भवेत्। मार्गशीर्षे भवेद्दुष्टः शेषे दुःखमवाप्नुयादिति। अत्राषा
ढो हरिशयनात्प्रागेवांगीकार्यो न परस्तात्तत्रापि मिथुनस्थसूर्येण कर्कस्थे दक्षिणायनांतःपातित्वान्नस्येति। तदेत
दुपेक्ष्यं। प्रागुक्तार्षवाक्यस्वरसात्॥ किंच॥ मिथुनस्थितेपि सूर्ये ततः सार्धषड्दिवसानंतरं॥ व्रतबंधादिनिषेधात्त्वा

राम
४९

र्द्रादिके स्वातिविरामकालेन कृच्छ्रं द्वेदशके रविश्चेत्। विवाहचोलव्रतबंधनाद्यं सुरप्रतिष्ठादिन कार्यमेवेति वसि
ष्ठादिवचनात्॥ उत्तरायणइतिनारदवाक्यं तुद्दक्षिणायननिषेधपरमित्याशंक्याप्रसक्तानुप्रसक्तम्॥ क्षिप्रेति॥ क्षि
प्राणि॥ अश्विनीपुष्यहस्ताः क्षिप्राणि प्रसिद्धानि। अहिरश्लेषा। चराणि श्रवणधनिष्ठाशततभपुनर्वसुस्वात्यः। मूलम्
हूनि प्रसिद्धानि॥ तिस्रः पूर्वाः। रौद्रमार्द्रा। एषु द्वाविंशतिभेषु व्रतबंधनं सत् शुभफलदात् भवेत्॥ उक्तं च। प्राजापत्या
दिषट्के भगार्कादिषु पंचसु॥ मूलादि दशके चैव समैत्रे व्रतबंधनमिति। अर्थाद्भरणीकृत्तिकामघाविशाखाज्येष्ठा
सु न कार्यमित्यर्थः॥ एतानि सर्वशास्त्रानक्रमेलकाभिप्रायेणोक्तानि। मुख्यानि त्वाह वसिष्ठः॥ हस्तत्रये च श्रवण
त्रये च धात्रद्वये अत्तरमैत्रभेषु॥ पौष्णद्वये वादितिभद्वये च शस्तं द्विजानां खलु मौंजिकर्मेति॥ द्विजानां ब्राह्मणक्ष
त्रियवैश्यानां॥ कश्यपोपि। मैत्रे विष्णुत्रये हस्तत्रये र्क्षे पूत्ररात्रये॥ धात्रद्वयादितिज्यांमदस्रर्क्षे षूपनायनमिति।
अर्थादार्द्राश्लेषाभरणीकृत्तिकाज्येष्ठाविशाखामघापूर्वात्रयमूलानि निंद्यान्यृषिमते न दाह गुरुः। कृत्तिकाभर

णां मूलज्येष्ठार्द्रासु विशाखयोः पूर्वात्रयेच सार्पमैत्रेनकुर्याद्दीपनायनं ॥ चकारान्मघार्यां ॥ ब्राह्मणस्य पुनर्वसु
निषेधमाह राजमार्तंडः ॥ चंद्रतारानुकूलेषु ग्रहाद्येषु शुभेष्वपि। पुनर्वसौ कृतो विप्रः पुनस्संस्कारमर्हतीति। अन्य
त्रापि स्मर्यते। अहः स्पृशिमलेमासि मृद्रत्वमधिगच्छति। पुनर्वसौ कृतो विप्रः पुनः संस्कारमर्हतीति। अत्र विप्रः।
कृत इति पदद्वयोपादानादितरयोः क्षत्रियविशोः पुनर्वसौ व्रतबंधो ब्राह्मणस्य मेखलामोक्षश्च प्रशस्त इत्यर्थः
केचित्तु केनचिन्निमित्तेन कर्मनाशानद्युत्तरणाद्यनेक दुष्कृत्येन पुनः संस्कारप्रसक्तौ समंविप्र पुनर्वसौ पुनः सं
स्कारमर्हतिन व्रतबंधनिषेध इत्येवं व्याचक्षते। नव्विंसं। पतः। जीवार्के हृद्रुशुद्धौ हरिशयनवहिर्भास्करे चोत्तरस्थे स्वा
ध्याये वेदवर्णाधिप इह शुभदे होरभेनादितो च। शुक्रार्के ज्यर्क्ष लग्ने रविमदनतिथिं प्रोह्यषष्ठाष्टमेंदुं नो जीवास्तातिं
चारेऽर्कसितगुरुदिने कालशुद्धौ व्रतं स्यादिति दीपिकायां पुनर्वसुनक्षत्रविषयक व्रतबंधस्यैव सामान्यतो निषेधो
क्तेर्विशेषवचनाद्ब्राह्मणो एव निषेधः पर्यवसन्नएक वाक्यतावलात्। पुनर्वसुनिषेधश्लोकद्वयेपि प्रवर्द्धस्यानत्व

याश्च ॥ अयं चाचारः प्राच्यानां । दाक्षिणात्यास्त्वेतन्न गणा कुर्वंति देशाचाराभावात् । उक्तं च वराहेण । देशाचारस्तावदादौ वि
चिंत्यो देशे देशे या स्थितिः सैव कार्या । लोके द्विष्टं पंडितानां वर्जयंति दैवज्ञा नो लोकमार्गेण यायात् ॥ अत्र विहितनक्षत्रे
षु वेधादिदोषास्त्याज्याः । तदुक्तं दीपिकायां । कर्णवेधे विवाहे च व्रते पुंसवने तथा । प्राशने चाद्यचूडायां विद्धमृक्षं परित्यजे
दिति ॥ अत्र वेधः सप्तशलाकाचक्रस्थो द्रष्टव्यः ॥ तदाह वसिष्ठः । पंचशलाकाचक्रे पाणिग्रहणे भवेद्वेधविधिरुक्तः ॥ श
स्तः शुभामित्र कृतः सप्तशलाकाज इतरत्रेति । इतरत्र यज्ञोपवीतचौलान्नप्राशनसीमंतादिष्वित्यर्थः । चक्रन्यासः स्व
रोदये । तिर्यगूर्ध्वगतारेखाः सप्तसंख्या लिखेद्बुधः कृत्तिकादीनि भान्यत्र साभिजिंति क्रमेण च ॥ भुक्तं भोग्यं तथा क्रांतं
विद्धं पापग्रहेण च शुभाशुभेषु कार्येषु वर्जनीयं प्रयत्नतः ॥ धिष्ण्याभिधाननक्षत्रं विद्धं क्रूरग्रहेण तु ॥ देशो ग्रामः पु
रं सैन्यं नरो नारी विनश्यतीति । अशुभेषु युद्धादिषु ॥ दीपिकायामपि । कृत्तिकादिचतुः सप्तरेखाराशौ परिभ्रमग्रहश्चेदे
करेखास्थो वेधः सप्तशलाकज इति । ग्रंथकर्त्रा तु विवाहप्रकरणे सप्तशलाकाचक्रोक्तिं विनैव परस्परवेधकं नक्ष

सं·टी०
५१

त्रहदंसिद्धवत्कृत्याभिहितं। नन्वेवसरखसंगादनकुतोनो- मितिचेत्॥ सत्यं॥ यस्याः शशी सप्तशलाकभिन्नः पापैरपा
पैरथवाविवाहे॥ रक्तांशुकैनैवचरोदगाच्छ्मशा- भूमिंप्रमदाप्रयातीति दीपिकाकारवचनात्। एवंसति विवाहनक्ष
त्राणामेव वेधज्ञानार्थं पंचशलाकाचक्रं विचार्यं॥ सप्तशलाकाचक्रं पुनर्विवाहादिसकलकर्म्मविहितनक्षत्रवेध
ज्ञानार्थं ज्ञेयमित्यपं निष्कर्षोर्थः॥ अयमेवच विवाहप्रकरणे वक्ष्यमाणो ग्रंथकर्तुराशय इत्यलं प्रसक्तानुप्रसक्तेन॥
वेधउपलक्षणं। तेन युतिलत्तापातादयो विवाहोक्ता दोषा अपि त्याज्याः। तदुक्तं वसिष्ठेन॥ निहतं त्रिविधोत्पातैः क्रू
राक्रांतं च विद्धभं तथाखिलं। त्याज्यं तच्छुभकर्म्मणि न यदितः पातविलग्नं वेति। नारदोपि। वीक्षितं वा यैर्वा- शन्महादो
षविवर्जितइति व्रतबंधप्रकरणे उक्तं वा। वाक्षितइति पूर्वेण संबंधः॥ ते - - - - वाहप्रकरणे वक्ष्यंते ग्रंथकृता॥ अ
र्केति॥ सूर्यबुधगुरुशुक्रचंद्रदिवसेषु व्रतं सत्स्यात्। अर्काद्रौमशनी निषिद्धौ तदाह नारदः॥ आचार्यकाव्यसौम्यानां
वाराः शस्ताः शशिनयोः। वारौ तौ मध्यफलदौ निंदितावितरौ व्रत इति॥ आचार्यो गुरुः। काव्यः शुक्रः॥ जगन्मोह

राम
५२

नेगुक्त। पापग्रहाणां वाराः स्युर्नशुभाश्चंद्रवासरः। सिते पक्षे प्रशस्तः स्यात्कृष्णे वारो विधोर्न हि। शुभो बुधो नास्त
मितः पापग्रहयुतोपि वेति रविवारं निषेधति स्म। अत्र सूर्यस्य प्राबल्यदौर्बल्ययोर्व्रतबंधस्य विधिनिषेधाविति वि
षयविवेकः। भौमस्तु निषिद्धोपि सामवेदिनामतिप्रशस्तः। यदाह नारदः। शाखाधिपतिवारश्च शाखाधिपबलं
शिशोः। शाखाधिपतिलग्नं च त्रितयं दुर्लभं व्रत इति। ग्रंथकृदप्यतदग्रे वक्ष्यति।। इति। द्वितीया तृतीया पंचम्येका
दशी द्वादशी दशमी संज्ञिता सुतिथिषु च व्रतं सत्स्यात्। यदाह नारदः। शुक्लपक्षे द्वितीया च तृतीया पंचमी तथा।
त्रयोदशी च दशमी सप्तमी व्रतबंधने। श्रेष्ठास्त्वेकादशी षष्ठी द्वादश्येतास्तु मध्यमाः। एकां चतुर्थीं संत्यज्य कृष्णप
पक्षेपि मध्यमा इति।। तिथिफलान्याह बादरायणः। प्रतिपदि मदिरासक्तः श्रुतिधर्मे बाधिको द्वितीयायां। नीतिज्ञो
मेधावी जितसकलारिस्तृतीयायां। मंदधिया हतविद्यो दीनश्चपलश्चतुर्थ्यां स्यात्। पंचम्यां बहुविद्यः पूर्णायुर्धन
पतिर्मतिमान्। षष्ठ्यामशुचिः सततं सप्तम्यां व्याधिसंतप्तः। अल्पायुरष्टम्यां नवम्ये धनवर्जितः सदा पुरुषः।

सं॰टी॰
५३

ःदशम्यामर्थसंषत्तिर्देकादश्यां गुणान्वितः। द्वादश्यां नातिशास्त्रज्ञो निधनाय त्रयोदशी॥ चतुर्दश्यां भवेन्नाशः पं
चदश्यां कृपी भवेदिति। अत्र वाको मध्यमापि षष्ठी निषिद्धैव। अत एव ग्रंथकृता नोक्ता। मध्यमे एकादशी द्वादश्यावति
प्रशस्ते॥ ननु सप्तमी त्रयोदश्योरनेनवाक्येनानिष्टफलोक्तेर्नारदवाक्ये कथं ग्रहणं॥ किंच। कृष्णपक्षे चतुर्थ्यादि सप्त
म्यादिदिनत्रयं। त्रयोदशी चतुष्कं च अष्टावेते गलग्रहा इति वसिष्ठेन गलग्रहत्वोक्तेश्च। उच्यते। वसंतविषयत्वा
त्रयोस्तिथ्योः। तदयुक्तं नारदे नैव। विनर्तुना वसंतं न कृष्णपक्षे गलग्रहे। अपराह्णे चोपनीतः पुनः संस्कारम
र्हतीति। अथवा माघशुक्लसप्तमी मन्वादिस्तस्या अपि ग्रहणं यथा स्यात्। अत एव मन्वाद्यपवादमाह वसि
ष्ठः। याचैत्रवैशाखसिता तृतीया माघे गसप्तमय फाल्गुनस्य कृष्णे द्वितीयोपनये प्रशस्ता प्रोक्ता भरद्वाजमुनींद्रमुख्यै
रिति। अत्र चैत्रशुक्लतृतीया मन्वादिः। वैशाखशुक्लतृतीया युगादिः। माघशुक्लसप्तमी मन्वादिः फाल्गुनपूर्णिमोत्तरं
द्वितीया चातुर्मास्यद्वितीया॥ आसामनध्यायत्वेपि व्रतबंधे प्राशस्त्यसद्भाव इत्यर्थः। अनध्यायं तत्र व समग्र प्रयोजनं स्मृति

राम
५३

सुक्तेत्यादिपद्यव्याख्यानावसरेऽस्माभिर्वक्ष्यते॥ कृष्णादिमेति। विहितमासस्य नां कृष्णपक्षस्यादिमेत्रिकेपंचम्यापर्यंतं
व्रतंसमाप्तं। नारदवाक्येषु शुक्लपक्षस्योक्तेरापंचम्याःस्थितेः कृष्णः शुक्लवत्सरिकार्त्तिन इति — — — वचनेनापवादतो
क्तेः। एकांचतुर्थींसंत्यज्य कृष्णपक्षेपि चोत्तमाः। आपंचम्याःस्थितिषष्ठ्यःपराःसुरतिनिंदिताइति नारदस्याप्युक्तेश्च
।वसिष्ठेपि।त्यक्त्वाचतुर्थीमपिकृष्णपक्षेत्वाद्यंत्रिभागंशुभदंव्रतेचेति॥ नचेति। त्रिधाविभक्तस्यदिवसस्यत्रयोविभागा
ःक्रमेणपूर्वाह्णमध्याह्नापराह्णसंज्ञाभवंति। उक्तंचस्कंदपुराणे। ऊर्ध्वंसूर्योदयात्प्रोक्तंमुहूर्त्तानांतुपंचकं। पूर्वाह्णःप्रथ
मःप्रोक्तोमध्याह्नस्ततःपरं। अपराह्णस्ततःप्रोक्तोमुहूर्त्तानांतुपंचकमिति तत्रापराह्णभागेव्रतंनसत्। अपराह्णेचोप
नीतःपुनःसंस्कारमर्हति। उक्तेः। युक्तंचैतत्। तस्मिन्समयेहिश्राद्धंकर्त्तुमुचितंनत्वितरच्छुभकृत्यं॥ यदाहनारदः। त्रिधा
विभज्यदिवसंतत्रादौकर्मदैविकं। द्वितीयेमानुषंकार्यंतृतीयेंशेतुपैतृकमिति। एतस्यफलमुक्तंमनुना। सर्वदेशेषु
पूर्वाह्णेमुख्यंस्यादुपनायनं। मध्याह्नेमध्यमंप्रोक्तमपराह्णेचगर्हितमिति। एवंसतिपूर्वाह्णेकदाचिल्लग्नासंभवेम

धाद्धसमयेपिसतिसंभवेलग्नंकार्यंपपराह्णेतुसर्वथानकार्यमितिनिष्कृष्टोर्थः॥ ॥अथव्रतबंधेसामान्यतोलग्न
भंगयोगंप्रमाणिकयाहकवाजचंद्रलग्नपारिपोमृतोव्रतेऽधमाः॥ अयेत्वभार्गवोतच्छातनोनृतोसुतेखलाः॥ ४१॥ अत्र
चलग्नार्थंराशयःसापवादात्रसिष्टेनोक्ताः। लग्नायसौम्यग्रहराशयोयेयाह्यानपापग्रहराशयोये॥ ग्राह्याह्यतेपित्र
वलैश्वसौम्यैरधिष्ठितास्त्वापिनिरीक्षितावा॥ अतएवाहनारदः। राशयःसकलाः श्रेष्ठाः शुभग्रहयुतेक्षिताइति
॥एवंसतिजर———हसिष्ठेनप्रत्येकंलग्नफलान्युक्तानि।मेषेभवतिवाकुंठोवित्तविद्यापुतोवृषे।युग्मेवेदार्थतद
शीवकुलीरेचषडंगवित्। शिल्पकर्मकरःसिंहेषष्ठेभवतिपंडितः॥तुलायांवणिजःप्राप्तिःकांउष्टष्ठस्रश्चिके
कांउष्टष्ठःशस्त्राजीवी।सर्वत्रपूजितश्चापेपूज्ववृत्तिर्मृगेतथा।राजप्रेष्ठोभवेत्कुंभेमानेवेदार्थपारगइति॥तानि
लग्नानांशुभाशुभग्रहाणामुत्तमनिंद्याधिष्ठाननिरीक्षणाद्यभावेदृष्टव्यानि।यदातुसंभवस्तदायथाहियोगाद
मृतायतेविषंविषायतेमध्वपिसर्पिषासममितिवचनाद्योगजमेवफलंभवतीति।तत्ररिपोषष्ठस्थानेमृतावष्ट

मस्थाने चेच्छुक्रबृहस्पतिचंद्रलग्नस्वामिनो भवंति तदाऽब्दमामरणकारकाः स्युः। अथाल्पमार्गवौ चंद्रशुक्रौ व्ययेचे
द्भवतस्तदातत्पामरणकराविसर्थः। खलाः पापग्रहा लग्नाष्टमपंचमस्थाने षुस्थिताश्चेत्तदा तथा मरणकरा इत्यर्थः
। अथ सामान्यतो लग्नशुद्धिमनुष्टुभाह। व्रतबंधेऽष्टषड्रिष्फवर्जिताः शोभनाः शुभाः। त्रिषडायेखलाः कर्कगोस्थ
ः पूर्णोविधुस्तनौ॥४२॥ शुभाः शुभग्रहा अष्टमषष्ठद्वादशस्थानस्थिताश्चेत्तस्युस्तदाव्रतबंधे शोभनाः शुभफ
लदायकाः। खलास्तुषष्ठैकादशस्थानस्थिताः शोभनाः। यदाह नारदः। त्रिषडायगतैः पापैः षडष्टांत्यविवर्जितैः। शुभैः ष
ष्ठांष्टलग्नांत्यवर्जितेनहिमांशुना॥ दैवज्ञमनोहरे गुरुः। लग्नस्थितेषु रंध्रे च पापेषु मरणं वटोः। सौख्यं स्यात्त्रिषडायेषु ज
उत्वमितरेषु च। चंद्रक्रूरास्तनौ नेष्टाः सर्वेरंध्रेव्ययेकविः। सितेंदुलग्नपाः षष्ठे मौंजीविद्यादिकर्मसु॥ मौंजीबंधे विशे
षेण प्राग्नग्रपंचमं तथा। क्रूरग्रहैर्विमुक्तं च भृगुराह तथाष्टमे। दाक्षिणात्यास्तिवसेवाहुः॥ चंद्रक्रूरास्तनौ नेष्टाः सर्वेरंध्रे
व्ययेकविः। सितेंदुलग्नपाः षष्ठे वटोः प्राणापहारकाः॥१॥ वटोः प्राणापहारका इति। अत्र शुक्रस्य मरणारूपंफल

सं॰टी॰
५५

मुक्तं नरेन त्वाच्चानस हृंते। अयस्याभगानाः सर्वे कुर्वंति अयशालिनां खलंतां चं पापरतं वंधुहीनं विदेशगामिनि वसिष्ठा
दिमुनि विरोधात्। नचैताहृशदुष्टफलश्रवणात् द्वादशो शुक्रो निषिद्ध एवेति चेत्। न। एवं सति द्वादशस्थानां सर्वेषाम
पिवर्ज॰ यत्न मापतेत् तत्रव्रत वापिसे॰ तेनास्ति सिर्वत्र॰ भः ह्रुक्षुत्राः षष्ठसप्ताष्टमं विनेति कश्यपोक्तेश्च। विशेषोव
सिष्ठेनोक्तः। द्वादशस्थं रविं भौमः पश्यन्नाचार्यने त्रहा। वलिनं वलवान्नून मचिरान्नात्र संशयः। सर्वे ग्रहा द्वाष्टम
गानि धनाधनशोकदाः। विनाश्वतुंगस्वर्क्षाधिमित्रगान् शुभवर्गगान्। आचार्यमशुभाघ्नंति शिष्यं घ्नंत शुभेतराः।
अस्यापवाद स्तेनैवोक्तः। चंद्रात्स्मरारिरं ध्रेषुपद्येकस्मिन् शुभग्रहे। स्थिते धियोगसंज्ञः स्याच्छुभयोगो द्विजन्म
नो। केंद्रत्रिकोणगो जीवे भानुः शुक्रोथवाप्यपि। द्वितीये शुभोपोगो द्विजानां गुपनायनइति। गुरुः। मेषगो कर्क
रास्थानां भानुशुक्रेंदवः क्रमात्। पमोदये भवे द्योगो द्विजोपनयने शुभइति। पमोदये मिथुनलग्नेकर्केति। पूर्णः
शुक्लपक्षीपो विधुः कर्कस्थो वृषस्थश्च समन्न नौलग्नस्थितोयदि भवेत्तदैव शुभो नान्यथा। पद्माहवसिष्ठः। प्राले

राम
५५

परशुभैर्यदिलग्नसंस्थेबलक्रूपक्षेपिभवत्सरोगीति।गुरुस्त्वा।चंद्रोदयेऽभिशस्तःस्यात्क्रूयरोगीसितेतरे॥शुक्लपक्षेभवेद्धनवा
स्वभेतुगेविशेषतइति॥चंद्रेउदयेइतिपदच्छेदः।मध्येंदुरितिवत्समाधिःपुक्तंचैतत्॥उपनयनेहिद्वितीयंजन्मतत्रहिरा
शिविशेषेणलग्नस्यचंद्रस्यप्राशस्त्यमभिहितं।तथावलघुजातकेवराहः।कर्कटवृषाजोपगतेलग्नेचंद्रेधनीसुरूपश्च
।विकलांगजडउदरिद्राःशेषेषुविशेषतःकृष्णेइति।कश्यपस्तुस्वस्थलग्नस्यचंद्रसंदेवन्यषेधीत।यथा।वर्द्धमानोपिवा
चंद्रःप्रोर्णोवायदितुगगः।निःस्वंकरोतिव्रतिनंलग्नगःक्रूयरोगिणं॥नारदोपि।स्वोच्चस्थितोपिशीतांशुर्व्रतिनोप
दिलग्नगः॥नंकरोतिवटुंनिःस्वमजनंक्रूपरोगिणंमिति।नदेतयोकृद्यस्थितचंद्रसंबंधिनोःपक्षेपोऽर्द्दशाचारतोव्यवस्था
।स्वगृहस्थचंद्रस्तन्मएवद्वयोर्मते॥ ॥अथवर्णेशशाखेशयोःव्रयोजनस्यवक्ष्यमाणत्वाद्वर्णाधीशंशाखाधीशं
चशालिन्याहविप्राधीशौभौमगावृज्योकुजार्कौराजन्यानामोषधीशोविशोच।शूद्राणांज्ञश्चांमजानांशनिःस्याच्छाखे
शाःस्युर्जीवशुक्रारसौम्याः॥४३॥ अत्रविप्राधीशावितिसमासांतर्गतमधधीशपदमन्यत्रानुषज्यते।तेनशुक्र

सं-टी-
५६

बृहस्पती ब्राह्मणानां स्वामिनौ। भौमसूर्यौ क्षत्रियाणां स्वामिनौ। चंद्रो वैश्यानां स्वामी। बुधः शूद्राणां स्वामी। शनिरंत्य
जानां चंडालादीनां प्रतिलोमजानां स्वामी। यदाह वराहः॥ विप्रादितः शुक्रगुरू कुजार्कौ शशी बुधश्चेत्यसितोंऽत्यजाना
मिति। स्वामिनाविति शेषः॥ ऋग्वेदोऽथ यजुर्वेदः सामवेदोऽथर्वण इति वेदक्रमाज्जीवसुक्रारसौम्याः शाखेशाः सु
ः। ऋग्वेदस्य गुरुः। यजुषः शुक्रः। साम्नो भौमः। अथर्वणो बुधः स्वामी स्मर्यते। तदाह नारदः। वेदानामधिपा जीवशु
क्रभौमबुधाः क्रमादिति। ऋग्यजुःसामशाखेशा गुरुशुक्रधरात्मजाः॥ अथर्वणस्य वेदस्य शाखेशश्चंद्रनंदन इ
ति वसिष्ठोक्तेश्च॥ अथानयोः वर्णेशशाखेशयोः प्रयोजनं वसंततिलकयाह शाखेशवारतनुवीर्यमतीव शस्तं शा
खेश सूर्यशशिजीवबले व्रतं सत्। जीवे भृगौ रिपुगृहे विजिते च नीचे स्याद्वेदशास्त्रविधिना रहितो व्रतेनः॥ ४४॥
यः स्वशाखाधिपस्तस्यैव वारस्तनुर्लग्नं च वीर्यं च गोचरोक्तप्रकारेण स्वगृहाद्यवस्थितत्वेन वा बलवत्वं च तद्व्रतं वे
धेऽतीव शस्तं। यथा गुरुरृग्वेदिनामीशोऽतो गुरुवारे गुरुलग्ने धनुर्मीनाख्ये गुरुबले च सत्युपनयनं शुभमेवं स

राम
५६

वैत्रापि श्लोपं। तदुक्तं नारदेन। शाखाधिपतिवारश्च शाखाधिपबलं शिशोः। शाखाधिपतिलग्नं च त्रितयं हर्षभं व्रते। शा
खेशेति। शाखावेदस्तस्येशः स्वामी तुल्यन्यायत्वाद्द्रेष्कोणेशोपि ग्राह्यः। सूर्यशशिजीवाः प्रसिद्धाः। एषां बले सति व्रतं
सत्स्यादन्यथा नेत्यर्थः। उक्तं च वसिष्ठेन। शाखेशसूर्यवेरीशगुरूणां बलपूर्वकं। ततोन्येषां गुरुबलं मुख्यमाचार्य
शब्दयोः राजमार्तंडे विशेषः। पितुः सूर्यबलं श्रेष्ठं शाखावेरीशयोर्वय — — वैषां गुरुचंद्रार्कबलं श्रेष्ठं व्रतादि
ष्विति रत्नमाला। वर्णाधिपे बलोपेते उपनीतिक्रिया हिता। सर्वेषां च गुरौ चंद्रे सूर्ये च बलशालिनीति। भीमपराक्रमः।
विप्राणां गुरुसितयो राज्ञां रविभौमयोर्बलं शस्तं। इंदोर्विशां रवौ दुविदहशेज्यबले रखिलानां तु। नारदेन तु प्रत्येकं
शाखेशादीनामुच्चादिस्थितत्वेन फलमुक्तं। स्वोच्चसंस्थितदृंशे वा स्वराशौ वा तद्दंशके। शाखेशे वा गुरौ शुक्रे वेदवे
दांगपारगः। परमोच्चगते जीवे शाखेशे वा यवासिते। व्रती शिष्टुर्धनाढ्यः स्याद्वेदवेदांगपारगः। मित्रराशिगते जी
वे तद्दंशे वास्वशारवपि। शुक्रे वा वार्यसंयुक्ते तदा तत्र व्रती शिष्टः। स्वाधिमित्रगृहस्थे वा तस्योच्चस्थितदंशके। गुरौ भृ

सं॰टी॰
५७

मौ वा शाखेशे विद्याधनसमन्वितइति ॥ शाखेशइत्युपलक्षणं। तेन वर्णाधिपेपेन तद्देवफलं। अत्र प्रमाणं रत्नमालावा
क्यं प्रागुक्तं। अथ शाखेशादीनां निर्बलत्वे फलमाहज्जीवइति ज्ञावे वा भृगौ वा च कारात् शाखेशे वर्णेशे वा वितिते युद्धे
पराजितेना वे स्वनीचराशिस्थिते सति व्रतेनानुष्ठितेन सता वेदशास्त्रविधि नावेदो वेदाध्ययनं शास्त्रं शास्त्राध्ययनं
विधिर्नित्यनैमित्तिक श्रौतस्मार्त्तकर्म्मानुष्ठाखतेषां समाहारद्वंद्वस्तेन रहितो व्रती स्यात्। तदुक्तं वसिष्ठेनानीच
हू ~ त्वाशकसास्थिते वा शाखेश्वरे वा सुजितो द्र ~ ज्ये। व्रतीशिश्रुर्हीनकुलप्रसूतः शास्त्रोपजीवा स्वकुलं विस
ज्य। नारदेनापि। स्वनीचगे तद्देशे वा स्वारिभे वातद्देशके। गुरौ भृगौ वा शाखेशे कलाशील विवर्जितः स्वाध्यायश
त्तुगरहस्येवातद्देशेवातदात्मतौ ॥ शाखेशे वा गुरौ भुक्ते महापातकत्कद्भवेत्। शाखेशइत्युपलक्षणं वर्णाधिपस्या
पि। तदुक्तं वसिष्ठेन। शाखेश गुरुशुक्राणां मौढ्ये वाल्ये च वार्द्धके। नैवोपनयनं कार्यं वर्णेशे दुर्बले सति ॥ ॥ शाखेश
गुरुशुक्राणामेकस्मिन् शत्रुनिर्जिते। विद्याहत्वार्थिभिस्तत्र न कार्यं चोपनायनं। अत्र नीचाद्यवस्थितत्वेपि शाखे

राम
५७

शगुरुशुक्राणामेकस्मिन् शत्रुनिर्जिते। विद्यार्थिभिस्तत्र न कार्यं चोपनायनं॥ अत्र नीचाद्यवस्थितत्वेपि शा
खेशादेः परिहारमाह वसिष्ठ एव। शत्रुनीचाधिशत्रुस्थे स्वांशे वा स्वोच्चभागगे। शाखेशे वा गुरौ शुक्रे न नीचफलम
श्नुत इति॥ ॥ उच्चादिसंज्ञामाह वराहः॥ अजवृषभमृगांगनाकुलीरा झषवणिजौ च दिवाकरादितुंगाः। दश १०
शिखि ३ मनुयुक् २८ तिथी १५ न्द्रियांशै ५ स्त्रिनवक २७ विंशति २० श्चतेऽस्तनीचाः॥ स्वगृहादिकं ग्रंथकृद्विवाहप्रक
रणे वक्ष्यति॥ ननु शुक्रे शत्रुगृहस्थे नीचगृहस्थे वा व्रतोपनयनं निषिद्धमिति सूक्तं। तदयुक्तं। शुक्रशत्रू रविचंद्रौ तद्गृ
हे सिंहकर्कौ तन्नीचं च कन्या ततः कर्कसिंहकन्याराशिस्थिते शुक्रे व्रतोपनयनं न कार्यमिति तु वाक्यार्थः संपद्यते तत्र
यदा शुक्रस्य कर्कादिराशित्रयावस्थितिस्तदा सामान्यतः सूर्यस्यापि दक्षिणायनगतत्वाद्व्रतोपनयननिषेधे सिद्धे पु
नर्निषेधो व्यर्थः॥ अत्रेयं समाधिसरणिः॥ यथा। यद्यपि सामान्यतः सूर्यस्य दक्षिणायनगतत्वं संभवति तथापि
विशेषतः व्रतानिरसंभवोपापतति। स्पष्टीक्रांतिवशतो हि सूर्यात्स्वाकूपश्चाद्वा एकराश्यंतरितो राशिद्वयांतरितो

सं-टि-
५९

वा शुक्रः संभवति -- कर्कादिराश्यवस्थिते सूर्ये शुक्रस्यास्य शीघ्रत्वात्कर्कादिराश्यवस्थितिः संभवतीत्युपन
यनकालहर्षिकार्थे वदाङ्गिरायनसद्भावात्। यदा तु वृषमिथुनस्थिते सूर्ये स्य शीघ्रत्वात्कर्कसिंहराश्यवस्थिति
ः शुक्रस्य संभवंतीति ------ केति सार्थक एव निषेधः। ननु शत्रुक्षेत्रावस्थितशुक्रनिषेधोऽभिहितः तदा तस्या
शुक्रस्य वनीचराण्यवस्थितशुक्रनिषे- ध्यर्थे- वपतः स्पष्टीकृत्वा जातोपि कन्यास्थितः शुक्रः कदाचिदपि दक्षिणा
यनेन व्यभिचरति। सत्यं। -- ग्रीष्मवर्ष ---- मातु द्विजन्मनां। मुख्यं साधारणं तेषां व्रतं माघादिपंचस्विति नारद
दिवाकरेभ्यः शरत्काले वैश्यानामुपनयनं विहितमित्यवगम्यते तत्र कदाचित्शुक्रस्य नीचराशिकन्यावस्थितेरुप
नयननिषेधेन वचनसार्थक्याद्दक्षिणायनेपि वैश्यानामुपनयनं प्रशस्तमुक्तं तदा तु सुतरां शुक्रस्य शत्रुगृहाणि मि
थुनकन्यावृषतुलाख्यानि तत्स्थे गुरौ वदेरुपनयननिषेधो नीचस्थितगुरुवत्शिष्टः कुतो नांगीक्रियत इति। उ
च्यते। अत्र शिष्टाशयः॥ यथा॥ गुरोरस्ते सिंहस्थे मकरस्थे वा गुरौ समस्तशुभकर्मणामारंभो निषिद्धो दोषप्रकूरतोपा

112

राम
५९

दात्तस्वनीचगइत्या।दिवाकस्यतूपनयनप्रकेरणेएवपाठानवस्यकताप्रतीयते आवश्यकत्वेतुदोषप्रकरणेए
वंनिषेधोवक्तव्यःस्यात्नचतत्रोक्तौसकलशुभकर्म्मणांनिषेधःस्यादितिवाच्यं।स्वनीचगइत्यस्यवाक्यस्यशेषेक
लाशीलविवर्जितइतिचरणरूपेमौंजीबंधनकार्येइतिपठितव्यमितितस्यैवनिषेधःसेत्स्यति।ननुमौंजीबंधमद्
मुपलक्षणत्वेनआख्यास्यते।यथा।उपनयनगोदानपाणिग्रहणंगृहप्रवेशगमनानि।अस्तमितेषुनकुर्य्यात्सु
रगुरुभृगुपुत्रचंद्रेष्वित्यादिषूपनयनपदानि।सत्यं।सर्वत्रोपलक्षणत्ववाक्यांतराणिविनाआख्यानंतुदुर्घटानिअ
त्रहिवापीकूपतडागयागगमनमित्याद्युक्तौ।दिवाकैकवाक्यतावशादुपनयनादिपदानामुपलक्षणत्वेनआक्षिप
तेनकेवलानितादृशवाक्यांतराभावात्एवंसतिदोषप्रकरणएवनिषेधेवक्तव्येयदुपनयनप्रकरणेदोषाभिधा
नेतद्दोकालांतरेसंभवतिहिषमिथुनकलुलास्थेगुरावुपनयनंनकार्य्यमित्येवंपरंतदसंभवेतुभवत्येवकालां
तराभावात्नीचस्थितगुरौतुसर्वथानभवतिदोषप्रकरणेपिपाठाद्वुर्वीयस्तुवत्।नीचराशिगतत्वेननिषेधसिद्धेत

दृंशकृनिषेधोराश्यंतरगेपिगुरौनीचांशकहान्यर्थमित्यलमतिप्रसंगेन॥५४॥ ॥अथसामान्यतोनिषिद्धस्यजन्ममासा
देरत्रव्रतबंधेऽपवादमनुष्टुभाह जन्मर्क्षमासलग्नादौ व्रतेविद्याधिकोव्रती॥ आद्यगर्भेपिविप्राणांक्षत्रादीनामनादि
मे॥५५॥ जन्मनक्षत्रेजन्ममासेजन्मलग्नेचादिशब्दे नजन्मतिथिः।एतेषुतत्स्वपिदोषेषुविप्रादीनामाद्यगर्भेपि
शब्दात्द्वितीयगर्भादावपिव्रती बालोव्रतेयज्ञोपवीतेविद्याधिकःस्यात्। क्षत्रादीनांक्षत्रियवैश्यानांपुनरनादि
मेद्वितीयगर्भादिबालकेसतिजन्मर्क्षमासलग्नादौविद्याधिकोव्रतीस्यात् आद्यगर्भेतुतेषांसर्वथाप्रतिषेधएवेति।
अत्रायमानुमंगलमिति। अत्राद्यगर्भेदुहितुः सुतस्यवेतिदेहलीदीपन्यायेनोभयत्रापिसंबध्यतेतेनजन्ममा
सादावाद्यगर्भस्यैवनिषेधः।तथाचसंभवत्येकवाक्यत्वेवाक्यभेदोहिदूषणमितिवाक्यभेदानापत्तेः। अतएवमहेश्व
रः नजन्ममासेनवजन्मधिष्ण्येनजन्मकालीयदिनेविदध्यात्।ज्येष्ठेनमासिप्रथमस्यसूनोस्तथासुतायाश्च
पिमंगलानीतिवाक्यांतेप्रथमस्येत्याद्युक्तवान्। अन्यश्चनारदोपि।नजन्ममासेजन्मर्क्षेनजन्मदिवसेपिवा।आ

द्यगर्भसुतस्या दुहितुर्वा करग्रहइइविशेषाच्च। अत्रं यापवादमाह शौनकः। जन्मोदये जन्मसुतारकासु मासे तथा
जन्मनि जन्मराशौ। व्रतेन विघ्नो न वदुकृतोपि प्रज्ञाविशेषोः प्रथितः पृथिव्यां॥ गर्भाष्टमे गर्गपराशराद्यैः फलं यदु
क्तं व्रतबंधने तु। ततोधिकं जन्मसुतारकासु मासे यथा जन्मनि वाउद्वाने। वाउवानां ब्राह्मणानां। द्विजात्यग्रजन्मभूदे
ववाडवाइत्यभिधानात्॥ प्रथमदशमैकोनविंशतिनक्षत्राणां ग्रहणार्थं जन्मसुतारकास्वित्युक्तं। पदृवंधनेत्या
दिना रद्ववांकंषाणुक्तमेव। गर्भाष्टमोपनयनफलमाह राजमार्तंडः। पञ्चाव संतसमये वदुवित्तभोगी गर्भाष्ट
मे विविधशास्त्रविशारदस्तु॥ वेदार्थपालनपरः खलु जन्ममासेत्र्क्षेपि जन्मनि बटुस्तु भाजनं स्यात्॥ ननु
विवाहे चोपनयने जन्ममासं च वर्जयेत्॥ विशेषाज्जन्मपक्षं तु वासिष्ठाद्यैरुदाहृतमिति जगन्मोहने गार्गवचनं
कथं संगच्छेतेति चेत्। सत्यं॥ कृत्तिपाराणां विशंवाद्यगर्भनिषेधार्थं भविष्यति। तथाराति द्वितीयगर्भादावुपनं
यनादि मंगलकृत्सुखोदर्कं स्यात्। विप्राणां तु वाडवानां निविशेषोक्ते राद्यगर्भी नाद्यगर्भसाधारणमुपनयनं

जन्ममासादौ। कुत इति चेच्छृणु। यो जन्ममासादौ निषेधः स आद्यगर्भस्यैव सोप्युपनयनवाक्येनापोद्यते द्वितीयग
र्भादौ तु निषेध एव नास्ति किं तदपवादेन॥ ॥ अथ गुरुबलमनुष्टुभाह वटुकन्ययोर्जन्मराशेस्त्रिकोणायद्विसप्तग
ः। श्रेष्ठो गुरुः खषडाद्ये पूजयान्यत्र निंदितः॥ ५६॥ वटुरुपनयनेऽधिकारी। उपलक्षणत्वाद्वरोपितया कन्या
स्त्री जातपत्नी। तज्जन्मराशेर्नवमपंचमैकादशद्वितीयसप्तमस्थानस्थितो गुरुः श्रेष्ठ उत्तमः। पराहस्त्रीपतिः।
स्वापधर्मी तनयद्युनस्थितो नाकनायकपुरोहितः शुभ इति। खेति। दशमषट्तृतीयप्रथमस्थानस्थितो गुरुः
पूजया धर्मशास्त्रोक्तपूजाविधानेन स्वनुष्ठितेन श्रेष्ठः। अन्यत्र चतुर्थद्वादशाष्टमरूपनिंद्यस्थानस्थितः सन्हि गु
णादि पूजया पास्वनुष्ठितयापि निंद्यो निषिद्ध इत्यर्थः॥ उक्तं च वरास्य इति। वसिष्ठेन तु विशेष उक्तः। वंधौ तृतीये रिपु
राशिसंस्थे वाछंति पूजां दशमे सुरेज्ये॥ नेछंति पूजां जनिगे व्ययस्थे पुरातना अष्टगगेपि सूरौ॥ जनिगे जन्मराशि
स्थे। चतुर्थजन्मस्थगुरोः पूज्यत्वपूजानिरपेक्षत्वविपर्ययाद्दशमे हेन व्यवस्थाध्येयात त्र पूजानिरपेक्षेपि गु

रोगुणवद्धरोपलब्धो कन्यायाः कालातिक्रांतायाविवाह उचितः। एतदप्युक्तं वराहेण। पूजामिलाषं प्रतिनिस्पृहेपि कुर्याद्गुरौ शुद्धिविवर्जितेपि। वराप्यलाभे शुभदं विवाहं वदंति गर्गाव्यवनादिमुख्या इति। अत्र चतुर्थद्वादशाष्टमस्था नस्थितत्वेन गुरोर्द्विगुणात्रिगुणादिकां पूजां विधायविवाहः शुभइति सांप्रदायिकोऽर्थः। विवाहइत्युपलक्षणं तेन व्रतबंधोप्येवमेव ध्येयः। तदुक्तं नारदेन। बालस्यबलहीनोपि शांत्याजीवोबलप्रदः॥ पथोक्तवत्सरेकार्यमनुक्तेनोपनायमिति। वसिष्ठेनापि। उक्तेपि वर्षे नबली गुरुश्चेच्छांत्याप्रशस्तं व्रतबंधकर्म। अनुक्तवर्षे सुबलप्रदोपि नैवेतयोरत्ववलं बलीय इति। अत्रवामदेवेन येगुरुशुद्धिमाह तस्तां हूषयति गर्गः। मौंजीबंधे विवाहे वप्रतिष्ठायां विशेषतः। गोचरे रोवकर्त्तव्यं वेधादिकमकारणमिति॥ प्राच्यास्तुगोचरबलाभावे अष्टवर्गबलेनैव व्रतबंधादिकमाहुः। यदाह राजमार्तंडः। अष्टवर्गविशुद्धेषु गुरुशीतांशुभानुषु॥ ॥ व्रतोद्वाहौ च कर्त्तव्यौ गोचरेण कदापि नेति। उपलक्षणमेतत्। यत्रकर्म्मणि यस्य यस्य --------------- ष्टतगाः शुद्धिर्विचार्या। एतद

संः टी·
६०

दि २ पस्वा २

याहसएवाऽष्टवर्गोणायेशुद्धास्तेशुद्धाः सर्वकर्मसुसूक्ष्माष्टवर्गसंशुद्धिः स्थूलाशुद्धिस्तु गोचरे॥ अभावतोगो
चरशोभनानां शुद्धिंवदेद्गुरिरष्टवर्गात्। वैधव्यकन्याक्रयहेतुयोगेजावाष्टवर्गस्यतदेवशुद्धिमितिः तत्र
गुरोरष्टवर्गोलिख्यते। वृहज्जातकेवराहः। कन्द्यायाष्टमदायवधुपुकुजा ७ स्वात्सत्रिकेषंगिरा ८ तत्सूर्योत्सविनवे
षुरुर्य धीस्वनवदिक्कुलाभारिगोभार्गवात् ६॥ जापायाप्यैनवात्मजेषुहिमगोपंमंदात्रिषडध्यायपे ४ दिग्धीषट्स्वसुखाप
र्ववनवगोज्ञा ८ त्सस्मरे षूर्य दपाहिति। एवंसतामपेक्षायांसूर्यादीनामष्टकवर्गास्ततएवज्ञेयाः॥ एवंजन्मकालीनग्रह
वशादुक्तस्थानेरेखांदत्वासांप्रतंविरुद्धफलदातृग्रहाधिष्ठितराशौरेखाधिकेऽशुभमन्यथानेतिनिष्कर्षार्थः। उक्तंचल
घुजातके। विफलंगोचरगणितंह्यष्टकवर्गेणनिर्दिशेत्सुसां॥ रेखाधिकेऽशुभदंविंदृधिकेनैवशोभनंप्रायः। अत्रप्रत्ये
केरेखाफलमुक्तंयवनाचार्यैः॥ कष्टंस्यादेकरेखायांहान्यायर्थक्षयेभवेत्। त्रिभिःक्लेशविजाभ्यां ८ चतुर्भिःसमतामता
॥ पंचभिःक्षेममारोग्यंषड्भिरर्थागमोभवेत्। संप्राप्ति - - - - दृष्टभिःराज्यसंपद्धइत्सलमतिधसंगोन॥ ॥ अथग्रंथकृ

राम
६०

न्स्वसते गुरु दौस्थ्यापवादमनुष्टुभाह स्वोच्चे स्वभे स्वमैत्रे वा स्वांशे वर्गोत्तमे गुरुः। रिष्फाष्टतुर्यगोपी शेनावारिस्थः शुभोप्य
सन्॥५७॥ गुरुर्द्वादशाष्टमचतुर्थाख्यानिंद्यस्थानस्थितोपि यदि स्वोच्चस्थाने कर्के स्वभे धनुर्मीनाख्ये स्वमैत्रे स्वमित्रगृ
हे मेषवृश्चिकाख्ये स्वांशे यस्मिन्कस्मिंश्चिद्राशौ धनुर्मीननवांशे। वर्गोत्तमे वर्गोत्तमनवांशे यथा वृषराशौ वृषनवांशे
गुरुर्वर्गोत्तम इति। वर्गोत्तमलक्षणमुक्तं वराहेण। वर्गोत्तमाश्चरगृहादिषु पूर्वमध्यपर्यंतगाः शुभफला नवभागसंज्ञा
इति॥ उपलक्षणत्वात्स्वोच्चादिनवांशेपि वा स्थितः स्यात्तदेष्टः शुभफलदाता। केचित्तु कन्यायेनाप्यन्येषु स्थानेषु तादृ
शो गुरुः शुभ एव॥ यदाह भुजबलः॥ वर्गोत्तमे स्वभवने भवने च मैत्रे मित्रांशके स्वभ कनोच्चनवांशके वा॥ जन्माष्टरि
ष्फरिपुखत्रिचतुर्थगोपि जीवः सुखार्थसुतवृद्धिकरो विवाहे॥ व्यासोपि। मित्रराशिगते जीवे स्वगृहे स्वोच्चगे पि वा। उद्वा
हिता यदा कन्या भवेत्पुत्रार्थसंयुतेति। तुल्यन्यायत्वाद्भर्तावपि ज्ञेयं॥ ननु गुरोः सूर्यचंद्रभौमा मित्राणि। एवं सति सिंह
कर्कावित्यपि कुतो न व्याख्यातमिति चेत्॥ नग-- हस्यस्य गुरोः स्वरूपेणैव निषेध इत्युक्तं प्राक्। कर्कस्थो गुरुरुच्चस्थः

एवेतिपुनरुक्तिः। अतः साधीयज्ञाग्व्याख्यानं॥ नीचेति॥ नीचं मकरः। अरिस्थः मिथुनकन्यावृषतुलाराशिस्थो गुरुर्गो
चरे राशुभोप्यसन् अनिष्टफलदातेत्यर्थः॥ तदुक्तं ज्योतिर्निबंधे उच्चस्थः स्वगृहे सुहृद्वर्गगो वा चस्यात्रिर्नित्यशः
पूर्णायुर्विविधार्थसौख्यजनको जन्माष्टमस्थोपि चेत्॥ नीचस्थोरिगृहे दिवाकरकरछायानुगामी सदा पापैः प्रनिष्ट
फलं ददाति निपतंवैधव्यदुःखापदमिति। अत्राष्टमस्थइत्यनेन सर्वथानिष्टफले गुरौ न चाष्टमं लक्ष्यं गुणां प्रपूज
येदिति वचनात्पूजा मनीहमाने प्युपनयनादि शुभं स्यात्॥ द्वादशचतुर्थस्थानस्थस्यतु द्विगुणपूजामिच्छन्नत्तथा
तृतीयादिस्थानस्थस्य पूजामात्रापेक्षस्य गुरोः शुभफलदातृत्वास्तीति किं वक्तव्यमिति केचित्तु कन्यापसूचनार्थोपि
शब्दः। न चाष्टममिति वा कोशत्रु गृहस्थितगुर्वभिप्रायं॥ अस्याप्यपवादो रत्नकोशेभिहितः। गोचराष्टकवर्गाभ्यां
दिशुद्धिर्न लभ्यते। तदोपनयनकार्यं चैवं मीनगते रवौ। हरेर्गसिंहांशगे जीवे नीचर्क्षे नीचभागगे। मौंजीबंधः शुभः प्रो
क्तश्चैत्रे मीनगते रवाविति गृह्यक्तेश्च॥ अथ व्रतवधे वर्ज्यपदार्थानत्नुष्टुभाह॥ क्लसेष्वहोषेऽनध्यायेशनौ निश्यपराह्णे

के। प्राक्तंध्यागर्जिते नेष्टो व्रतबंधो गलग्रहे॥५८॥ एषु दुष्टपदार्थेषु सत्सु व्रतबंधो नेष्ट इति वाक्यार्थः। तत्र कृष्णे प्रथ
मत्रिभागरहिते कृष्णपक्षे। आपवम्यास्तिथयः पराः सुरतिनिंदिता इति नारदोक्तेः। तथा प्रदोषे यस्मिन्दिने संध्याका
ले प्रदोषो भवेत्तद्दिवसे व्रतबंधो नेष्टः। प्रदोषलक्षणं स्वयमेव वक्ष्यति। अनध्यायेपि नेष्टः। अनध्यायानग्रे वक्ष्यति। श
नौ नेष्टः। अत्र संमतिरुक्ता॥ निशिरात्रौ नेष्टः। अपराह्णकेपि नेष्टः। अत्र संमतिवाक्यं प्रागलेखि। इयं पुनरुक्तिः स्म
रणाविच्छेदार्था। तथा प्राक्तंध्यापातः संध्यातस्पागर्जिते मेघध्वनावनध्यायनिमित्ते सति नेष्टः। यदाह वसिष्ठः। व्रते
द्विपूर्वसंध्यायां वारिदो यदि गर्जति। तद्दिनं स्यादनध्यायं व्रतं तत्र विवर्जयेदिति। संध्यालक्षणं प्रागुक्तमस्माभिः। तथा
गलग्रहे गलग्रहाख्ये दिवसे व्रतबंधो नेष्टः॥ गलग्रहानाह गुरुः। त्रयोदश्यादि चत्वारि सप्तम्यादिदिनत्रयं। चतुर्थी चैकतः
प्रोक्ता अष्टावेते गलग्रहाः। यत्तु वसिष्ठेन। कृष्णपक्षे चतुर्थीति सप्तम्यादिदिनत्रयं। त्रयोदशी चतुष्कं च अष्टावेते गल
ग्रहाः इत्यत्र कृष्णपक्षीयचतुर्थीग्रहणं कृतं तद्दोषाधिक्यज्ञापनार्थं न तु शुक्लपक्षीयचतुर्थ्याग्रहणार्थं — तः। गु

सं·टी·
६२

रुवाकास्मवैयर्थ्यापत्तेः॥ अत्र दैवज्ञमनोहरे–––प्रदोषे निशपनध्या। येमंदे कृत्स्ने गलग्रहे॥ मधंविनोपनीतस्य पु
नः संस्कारमर्हतीति। मधुं चैत्रे॥ ज्योतिर्मनुः। अनध्यायोपनीतस्य पुनः संस्कारमर्हति। गलग्रहे प्रदोषे च स्वल्पापुत्र
पजायते इति। नच्चत्ररात्रिनिषेधोयमर्थः। यतो दिवसे पूर्वाह्णादयस्त्रयः कालाउपनयने श्रेष्ठमध्यमाधमाउक्ताः। य
दाह मनुः। सर्वदेशेषु पूर्वाह्णे मुख्यं स्यादुपनायनम्॥ मध्यमाह्ने मध्यमं प्रोक्तमपराह्णे च गर्हितमिति। तत्रापरा
ह्णोपनीतस्य पुनः संस्कारेमर्हतीत्यपराह्णकालस्यापि निषिद्धत्वात्कैमुतिकन्यायेन रात्रिरपि निषिद्धेति वाचनिको
रात्रिनिषेधो व्यर्थ इति वेत्सत्यं। अंगवंगकलिंगेषु सौराष्ट्रमगधेषु च॥ तीर्थयात्रां विनागच्छन्पुनः–––र्हतीति
पुनः संस्कारनिमित्तापत्तौ निमित्तानंतरमेव नैमित्तिकमिति न्यायेन पुनरुपनयने प्राप्ते यदि रात्रिसद्भावस्तदोपनय
नं माभूदिति रात्रिपदोक्तिः॥ ॥ अनयैव रीत्या प्रदोषोक्तिरपि सार्थिका। यतः सायंकालसमयः प्रदोषशब्दवाच्यः
प्रदोषो रजनीमुखमित्यमरोक्तेः॥ ॥ वयं तु प्रदोषग्रहणाद्यद्दिने लक्षणविशिष्टः प्रदोषो भावी तद्दिनमुपनयने

राम
६२

123

नेत्याऽत्रमिति ब्रूमः। यत्रापराह्णकालो निंदितस्तत्रप्रदोषस्त्व सुतरां निंद्य इति प्रदोषग्रहणसामर्थ्यात्। पुनरुपनयन
निषेधार्थं प्रदोषग्रहणमिति चेन्न। रात्रिपदवत्सर्वथा वैयर्थ्ये सत्येवं गतिर्युक्ता नच नवत्वपशमः। अत एव निबंधकर्तृ
भिरुपनयनप्रकरणे एवं प्रदोषलक्षणवाक्यानां लिखितत्वात्। यद्यपि तानि सर्वविद्याविघातकृदिति तत्त्वनाधीय
तेनरैरिति चेत्यादीनि सामान्यतो विद्यारंभे दोषं भविषयकाणि तथापि प्रथमातिक्रमे कारणाभावादकरस्वीकार
स्थल एव तल्लिखनस्य युक्तत्वात्। ततः शिष्टाः सापंयपहिने प्रदोषस्तादिने गारुडग्रहादिने ष्युपनयनं न कुर्वंति। उक्तं च शा
र्ङ्गधरीये। स्वाध्याये पूर्वाह्णे प्रदोषरहिते तिथावरिक्ते च। हित्वा शनि कुजवारौ स्वाध्याये पूर्वयन दिवसे चेति न चानध्याये
षु गलग्रहेषु च व्रतबंधो निषिद्ध इत्युक्तं तद्युक्तं। विहिततिथ्यभावादेव न भविष्यति विहितास्तिथय इमाः द्वितीया
तृतीया पंचमी षष्ठी दशम्येकादशी द्वादश्येषा हिता। स्तित्यादिनोक्ताः। उच्यते। द्विविधा ह्यनध्याया नित्या नैमित्तिकाश्च।
नित्या अष्टम्यादयो नैमित्तिका मन्वाद्यास्तत्र मन्वादिराषाढशुक्लदशमी स्वाध्याय एवासोपपदा अपि स्वाध्याया एव।

सं॰टि॰
६३

।संक्रांतिः कदाचित्स्वाध्यायेष्वपिस्यादित्येतासु तिथिषु प्रबंधो माभूदित्यासामनध्यायत्वोक्तिः॥ चैत्रशुद्धे वैशाखशु
द्धतृतीययोर्मन्वादियुगाद्योस्तया चैत्रे वैशाखसिततृतीयेत्यादिवसिष्ठवाक्येन प्रागिकं व्रतबंधविषयत्वं। अन्यासामन्वा
दिस्वाध्यायतिथीनां दाक्षिणायन।। तानामनध्यायत्वं प्रथमवेदारंभो माभूदिति प्रयोजनं व्रत्यनाधीयते नैरं।—
तिकरेणोते ऽभिधानात्। वेदस्योपलक्षणात्मकलविद्यारंभोपि। एतद्व सामान्यतः सर्वासामध्यनध्यायतिथीनां प्र
योजनं। मन्वादितिथिषु दानादिकमपि प्रयोजनं स्मर्यते मत्स्यपुराणे। मन्वंतरादयश्चैते दत्तस्याक्षयकारका इति।
अथ चतुर्दशादयो य— नध्यायास्तेषां चोरं त्वदाविहितप्रतिषिद्धत्वाभावान्मध्यमत्वावसायात्तिथीनां स्यात्तत्रयथा
स्वशाखीयनक्षत्रालाभे अनिषिद्धान्यन्यान्यपि नक्षत्राणि गृह्यंते तथा कदाचिद्विहिततिथ्यलाभे मध्यमतिथिष्व
पुपनयनस्यात्तन्माभूदित्येतदर्थं चतुर्दश्यादीनामनध्यायत्वं। एतदेव समाधानं तुल्यन्यायत्वाद्गलग्रहेष्वपि
क्षेयम्॥ किंच। विद्यारंभो व्रतोद्देशः क्षौरं चैव विशेषतः। गलग्रहे न कर्त्तव्यं संपदीच्छे सुचजीवितमिति गुरुणाक्तौ।

राम
६३

रादिनिषेधात्के श्वा। क्वचिद्दत्तूनापि कर्माणि गलग्रहे निषिद्धानि। उक्तं च। चूडां व्रतं तथोद्वाहं कर्णयोरपि वेधनं। गल
ग्रहे न कर्त्तव्यं यदीच्छेत्पुत्रजीवितमित्यलमतिप्रसक्तानुप्रसक्तेन॥ ॥ अथ व्रतबंधलग्ने रव्याद्यंशफलमनुष्टुभाह
॥ क्रूरो जडो भवेत्पापी पटुः षट्कर्म्मकृद्द्विजः॥ यज्ञार्थभाक् तथा मूर्खो रव्याद्यंशेन नौ क्रमात्॥ ५८॥ षट्कर्म्माणि
अध्ययनाध्यापनयजनयाजनदानप्रतिग्रहाः। उक्तं च व्यासेन॥ यजनं याजनं चैव तथा दानप्रतिग्रहौ॥ अध्या
पनं चाध्ययनं षट् कर्माणि धर्मभाक् द्विज इति॥ अन्यत्स्पष्टार्थं॥ तदुक्तं रत्नमालायां॥ शन्यंशे ह्युदयति मूर्खता
र्कभागे क्रूरत्वं भवति च पापधीः कुजांशे। चंद्रांशे त्वति जडता बुधे पटुत्वं यज्वत्वं गुरुभृगुभागयोर्गरीयान्नीति॥
भीमपराक्रमोपि। भवेत्क्रूरो जडः पापः पटुर्यज्वा मखान्वितः। मूर्खश्चार्कादिकांशेषु क्रमेणाद्रपवर्णिषिति[?]। एवं स
ति बुधगुरुशुक्रस्वामिकराशिनवांशा ग्राह्याः। एतच्च स्पष्टमुक्तं नारदेन। लग्नेऽथ राशयः श्रेष्ठाः शुभग्रहयुतेक्षि

ताः। शुभा नवांशा न तथा ग्राह्यास्ते शुभराशयः। न कदाचित्कर्कटांशः शुभग्रहयुतोपि वा। तस्माद्धोमिथुनांशा
श्च तुलाकन्यांशकाः। शुभा इति। अस्त्रीधनुः। तथा सति वृषमिथुनकन्यातुलाधनुर्मीनांशा ग्राह्या इति निष्कृष्टो
र्थः॥ ॥अथात्र चंद्रनवांशफलं स्वनवांशे साप्यवाहं मोरनकं छंदसाह। विद्यानिरतः शुभराशि-- पापांशगते
हि दरिद्रतः-- खलवे बहुदुःखयुतः कर्णादिति भेधनवान्खलवे॥५०॥ यस्मिन्कस्मिंश्चिद्राशौ चंद्रो यदि शुभ
ग्रहराशिनवांशे स्यात्तदा व्रती विद्यानिरतो भवेत। यदि पापग्रहराशिनवांशे चंद्रस्तदा दरिद्रतरोधनधान्यरहितः
स्यात्। यदि स्वलवे कांशे स्यात्- बहुदुःखसहितो भवेत्। उक्तं च कश्यपेन। शुभग्रहांशगे चंद्रे विद्यावान्धनवा
न्व्रती। तस्मिन्पापांशसंस्थे तु निर्धनोऽखिलदुःखभाक्। स्वांशसंस्थे निशानाथे दरिद्रः खलदुर्जन इति। वसिष्ठे
न प्रत्येकं फलमुक्तं। सूर्यांशकगते चंद्रे महापातककृद्व्रती॥ परोपापसेवी स्वांशस्थे नीचो निस्वः खलः सदा॥
कुजांशकगते चंद्रे शस्त्रजीवी खलो व्रती। बुधांशकगते चंद्रे वेदवेदी भवेद्दुः। जीवांशकगते यज्ञासांगवेद

विशारदः। शुक्रांशके धनी दाता विद्यावृत्तविशारदः। द्विषो हाहीयज्ञकृत्स्यात्तत्र दो भोगवान्भवेत्। सौरांशकग
ते चंद्रे सदा चांडालसेवकः इति॥ अथ स्वांशस्थितस्य चंद्रस्यापवादमाह करोतीति। यदि कर्मश्रवणानक्षत्रे अदितिसौ
पुनर्वसु भे चोपनयने सति स्वांशस्थचंद्रस्य न नांशश्चेत्स्यान्न दाव्रतीधनवान्स्यात्। तदुक्तं नारदेन। श्रवणादितिनक्ष
त्रे कर्कांशस्थे निशाकरे। तदाव्रती वेदशास्त्रधनधान्यसमृद्धिमानिति॥ ॥ अथ केंद्रस्थानां सूर्यादीनां फलमनुष्टु
भाह॥ राजसेवी वैश्यवृत्तिः शस्त्रवृत्तिश्च पाठकः॥ प्राज्ञोऽर्थवा— छ्रेसेवी केंद्रैरार्यादिखेचरैः॥ ५१॥ केंद्रे सूर्यादि
ग्रहैः प्रत्येकं सहितेक्रमादिदं फलं ज्ञेयमित्यर्थः। अन्यत्स्पष्टम्। यदाह श्रीपतिः॥ स्वानुष्ठाने रतः स्यात्सवरमा
तिपुतः केंद्रसंस्थे सुरेज्ये विद्यासौख्यार्थपुत्रो भृगुशनसि शशिजेध्यापकश्च प्रदिष्टः॥ सूर्ये राज्ञोपसेवी भवति धरणि
जे शस्त्रवृत्तिर्द्विजन्माशांशो वैश्यवृत्तिर्दिनकरतनये सेवकश्चांत्यजानां। अंत्यजानां चंडालानां। अत्र लग्न
स्य चंद्रस्य च शनिं विना शुभाः पापाश्चाशुभफला इत्यवगम्यते। मुनिभिस्तु केंद्रे पापा निंद्या इत्युक्तं। यदाह नारदः

सं॰टी॰
६५

।सूर्जितंकेंद्रगेभानौव्रतिनोवंशनाशनं।कुजितंकेंद्रगेभौमेशिष्याचार्यविनाशनं॥कपेतिरुदितंकेंद्रसंस्थेमंदेमहा
गदं।लग्नकेंद्रगतेराहौरंध्रेमातृविनाशनं।उग्रेकेंद्रगतेकेतौव्रतिविघ्नविनाशनमिति॥तत्रसूर्यस्यसर्वशास्त्राधिप
त्वात्केंद्रसंस्थत्वमावश्यकविषयंद्रष्टव्यं॥उक्तंचदैवज्ञमनोहरे⁻⁻।सर्वशास्त्राधिपंभानुंकेचिदूचुर्महर्षयः।तस्माद्व्रतं
तराभावेलग्नस्थोऽर्कःप्रशस्यते॥लग्नग्रहणांकेंद्रोपलक्षणं॥तथास्वगृहोच्चाद्यवस्थिताःपापग्रहाःकेंद्रस्थाःशुभफ
ल⁻⁻त्नारोऽन्यथानेत्यर्थइतिविरुद्धार्थयोपर्वचनयोर्विषयविवेकः॥ ॥अथचंद्रगुरुशुक्राणांग्रहयुतौफलमनु
ष्टुभाह।शुक्रेजीवेतथाचंद्रेसूर्यभौमार्किसंयुते।निर्गुणःक्रूरचेष्टःस्यान्निर्धनःसद्युतेपटुः॥५१॥शुक्रेतथाजीवेगु
रौतथाचंद्रेचप्रत्येकंसूर्यसंयुतेव्रतीनिर्गुणःस्यात्।एवंभौमसंयुतेसतिक्रूरचेष्टःक्रूराहिंसनशीलाचेष्टाहस्तादिव्या
पारोयस्यसतादृशःस्यात्।तथार्किःशनिस्तेनसंयुतेनिर्धनोनिर्लज्जोनिर्दयोवास्यात्॥तथातस्मिन्नेवशुक्रेजीवेचंद्रेवा
प्रत्येकंसद्भिश्चंद्रबुधगुरुशुक्रैर्युतेपटुःसर्वविद्यानिपुणःस्यात्।उक्तंचरत्नमालायां।सार्केजीवेनिर्गुणोर्थेनहीनः

राम
६५

ः क्रूरः सौरे वाक्पटुः सत्यमेतत्। भानोः पुत्रे राज्ञसो निर्धनाश्च स्याद्रुक्के हृज्जीववत्संप्रकल्प्याविति॥ ॥अथ चंद्रवशेन
शुभाशुभयोगौ रत्नमालिकयाह। विधौ सितांशगे सिते त्रिकोणगे गुरौ तनौ॥ समस्तवेदविद्व्रतीयमांशगेः तिनिर्धनाः
॥५३॥ विधौ चंद्रे शुक्रांशगे सति शुक्रे च नवमपंचमस्थानस्थिते गुरौ लग्नस्थे च सति व्रती वटुः समस्तांश्चतुरो वेदान्वे।
त्ति जानातीति तादृशः स्यात्। एवं यमांशगे शनिनवांशस्थिते चंद्रे सति लग्ने गुरौ च सति सिते त्रिकोणगे च सत्यपि तिनि
र्धनाः स्यात्। यदाह महेश्वरः। जीवे लग्नमधिष्ठिते भृगुसुते धर्मात्मजस्थे विधौ शुक्रांशेऽखिलवेदविद्व्रतिसुतस्यांशे कृ
तघ्नोऽधम इति। अ— —तु शुक्रयुक्ते पिशनांशस्थे चंद्रे सत्यपि निर्धना इति व्याचक्रते। तदुक्तं रत्नमालायां। लग्ने जीवे भा
र्गवे च त्रिकोणे शुक्रांशस्थे स्याद्विधौ वेदवेदी। सौरांशस्थे सूरिलग्ने सशुक्रे विद्याशीलघ्नोज्झितः स्यात्कृतघ्न इति॥ सूरि
लग्ने सूरिर्बृहस्पतिस्तद्युक्ते लग्ने॥ इति व्रतबंधे लग्नविचारः॥ ननु व्रतबंधे वटुराशितोऽष्टमभवचादिशुद्धिरुक्ता॥ यदाह
वसिष्ठः। न नैधनं नैधनशुद्धिभग्नं न नैधनर्क्षं न च तन्नवांशः। न नैधनेशो न तदृशको वा लग्ने प्रशस्तो न चराद्विनाथ

सं॰टी॰
९९

इति॥ साग्रंथकृतात्र कुतो नोक्तेति। अत्र ग्रंथकृदाशयं ब्रूमः। दृष्टीक्षिते वाथैकविंशकमहादोषविवर्जिते इति नारदो-
क्तेस्तेषां दोषाणां च विवाहप्रकरणे वक्ष्यमाणत्वात्तत्रापि दंपत्यो‾शुभमेल‾मित्यपि दोषः सलक्षणो वक्ष्यते तत्र दंप-
त्योरिति संस्कार्योपलक्षणं तेन वरोरस्य शुभभवनशुद्धिरुक्तैवेत्यत्र पुन‾र्नोक्ता। एवं त्वेकविंशतिदोषविचारो ना‾सी-
मंतादौ किंतु कतिषयदोषविचारस्तत्र तु साक्षाद् शुभभवनशुद्धिरुक्ता। अग्रेपि यात्रादौ वक्ष्यते वेति। एवं चैतेन धनन-
वांशशुद्ध्यादि कुतो नोक्तं॥ सत्यं। वक्तव्यमेवेति ब्रूमः। परं तु नारदाद्यनेकमुनिभिरप्रणीतत्वान्नोक्तमिति ग्रंथकर्तु-
राशय॥ एवंविधे व्रतवंधलग्ने व्रतवंधं कुर्यात्। तदाह नारदः॥ शुभलग्ने शुभांशे वा नधने शुद्धिसंयुते। लग्ने त्वन्यैः
सौम्यखे‾ संयुते वा निरीक्षिते। जीवार्कशुक्रचंद्राद्यैः पंचभिर्बलिभिर्ग्रहैः। स्थानादिबलसंपन्नैश्चतुर्भिर्वा बला-
न्वितैः। वीक्षिते वाथैकविंशन्महादोषविवर्जिते इति॥ अथ सर्वथा यदि निर्दुष्टं लग्नं न लभ्यते तदा का गतिरिति। उच्य-
ते। वेधादिमहादोषराहित्ये सत्यल्पदोषसत्वे गुणाधिक्ये च लग्नं साधीयो भवति॥ तदुक्तं नारदेन। लग्नं सर्वगुणोपतं

राम
९९

[OrderDescription]
,CREATED=29.09.20 11:08
,TRANSFERRED=2020/09/29 at 11:24:36
,PAGES=131
,TYPE=STD
,NAME=S0003754
,Book Name=M-1454-NAISHDHIYE CHARIT TIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF